स्त्रीशूद्रपतितानांचवर्जयेदभिभाषणम् पवित्राणिजपेन्नित्यंजुहुयाच्चापिशक्तितः ॥ २ ॥ अथतप्तकृच्छ्रप्रत्याम्नायमाह ॥ देवलः ॥ तप्तकृच्छ्रस्यसर्वस्यप्रत्याम्नायोमनोःकृतः अशक्तानांचकृपयाकर्त्तुमुक्तःपुरानघ ॥ तमेवाहंब्रवीम्यद्यशृण्वंतुद्विजसत्तमाः ॥ १ ॥ कलौयुगेविशेषेणह्यन्नत्यागान्मृत्युंगच्छति ॥ पराशरः ॥ कृतेचर्माश्रितः प्राणः त्रेतायांकीकसाश्रयः द्वापरेरक्तमाश्रित्यकलावन्नंसमाश्रितइति ॥ १ ॥ कलौयुगेद्वादशरात्रसाध्यकृच्छ्राणां कर्त्तुमशक्तान् निरीक्ष्य ऋषयः प्रत्याम्नायमुक्तवंतस्तमेवाहात्रैव गौतमः महतस्तप्तकृच्छ्रस्यब्रह्महत्यानिवारिणः तुलाप्रतिग्रहीतॄणांशोधकः स्यान्महामुने ॥ १ ॥ प्रत्याम्नायस्तदाप्रोक्तोयदाचसुसमागमः ॥ स्वयंभूःकृपयान्दृणांगवांविंशतिमादरात् सवत्सावहुदुग्धाश्चसाधुशीलाद्विजातये २ ॥ द्विजातिभ्यइतिवक्तव्ये जातावेकवचनम्

णांकी स्थिति अस्थीयांविषे रहतीहै और द्वापरयुगविषे रुधिरके आश्रय प्राणस्थितिहै और कालियुगविषे अन्नकेआश्रय प्राणांकी स्थितिहै १ इसकारणतें कालियुगविषे बारां १२ दिनांकर्के व्रत करणे विषे पुरुषसामर्थां वाले नहि ऐसेविचार कर ऋषि प्रत्याम्नायकों कहते भये तां तिस तप्तकृच्छ्रकों गौतम ऋषि कहताहै हेमहामुने तुला दानके प्रति ग्रहकों लयणे वाले जो पुरुष हैं तिनांके पापांकों दूर करणे वाला वड्डा जो तप्तकृच्छ् व्रत सो कहाहै कैसा व्रत है जो ब्रह्महत्याके भी दूर करणे वालाहै १ प्रत्याम्नाय तद कहाहै जद महात्माका संगमहोवे तो ब्रह्मा पुरुषां उपर कृपाकरके कहताहूया गौयांसहितबछयांके दुग्ध देणे वालीयां और भले स्वभाववालीयां वीस २० आदर करकें ब्राह्मणांकेतांई देणे योग्यहैं द्विजातये एह जाति विषे एक वचनहै । २ ।

अब इसीविषे मरीचिऋषिका वचनहैं पापांके नाश करणे वाला जो तप्तकृच्छ्रहै बडा ब्रह्मरूप तिसका बदला एहहै बीस २० गौवां आदर कर्के ब्रह्मणांके तांई देवे ॥ १ ॥ अब पराशरजी काबचनहै वडा जो तप्तकृच्छ्र तिसका बदला वस्त्र और भूषणांके साथ सहित बछयांके ॥ २० गौवां आत्मज्ञानके विचार कर्के युक्त जो ब्राह्मण तिनांके तांई देता हुवा ॥ १ ॥ शुद्धिकों प्राप्त होताहै हेराजेंद्र ऊौर तप्त कृच्छ्रके फलकों प्राप्तहोताहै तिस कारणतें तिनांवर्णां विषों जो तप्तकृच्छ्र व्रतके करणे विषे नहि समर्थावाले तिनांनें प्रत्याम्नाय करणे योग्यहैं ऊौर पीछे पंचगव्यका पान करणा ऐसा किहाहै ॥ २ ॥ ऊौर तुला आदिक दानके ग्रहण करणे वाले जो पुरुष हैं तिनांकों तिस प्रतिग्रहदोषके दूरकरणे वाले प्रायश्चित्त करण विषे एहि

मरीचिः पापनाशककृच्छ्रस्यतप्तस्यब्रह्मरूपिणः दद्याद्द्विजातयेसम्यग्गवांविंशतिमादरात् १ पराशरः॥ महतस्तप्तकृच्छ्रस्याविप्रायाध्यात्मवेदिने सालंकारांसवत्सांचधेनुर्विंशतिकांददन् ॥ १ ॥ शुद्धिमाप्नोतिराजेंद्रतप्तकृच्छ्रफलंलभेत् ततोद्विजातिभिःकार्य्यास्त्वशक्तैस्तप्तरूपिणः पंचगव्यंपिबेत्पश्चात्प्रत्याम्नायइतीरितः ॥ २ ॥ तुलादिप्रतिग्रहीतॄणामपीयमेवगतिस्तत्प्रायश्चित्तकरणविषये ॥ अपरार्के ॥ अतिकृच्छ्रेपराकेचतप्तकृच्छ्रेतथैवच प्राजापत्यत्रयंकुर्यात् कृच्छ्रेगोमिथुनंभवेत् ॥ १ ॥ स्मृत्यर्थसारे। मासोपवासस्थाने पंचदशप्राजापत्याइति चतुर्विंशतिमते धर्मनिष्ठास्तपोनिष्ठाः कदाचित्पापमागताः जपहोमादिकंतेभ्योविशेषेणाभिधीयते ॥ १ ॥

तप्तकृच्छ्रव्रत कहाहै ॥ अब अपरार्क विषे कहाहै यथा अतिकृच्छ्रव्रत विषे ऊौर पराक व्रत विषे और तप्त कृच्छ्र व्रत विषे तिस प्रकार प्राजापत्यत्रय करे ऊौर कृच्छ्रव्रतविषे एक गौ ऊौर बलद दानकरे ॥ १॥ अब स्मृत्यर्थसारविषे कहाहै जो एक मासका उपवास व्रत कहाहै तिसका बदला पंदरां १५ प्राजापत्यव्रत कहने इसमे एह अभिप्रायहै कि प्राजापत्य ६ उपवासके तुल्य हैं ऐसा अगेस्थापनहोणाहै तिसकेहिसावसें ५ पंच प्राजापत्यमासोपवासकी जगा आउतेहैं परंतु इसकों अति कष्टदायी जाणकर इसकी जगा १५ पंदराकहेहैं ॥ ऊौर चतुर्विंशति मत विषे कहाहै धर्मेति जो पुरुषधर्म विषे युक्त हैं ऊौर तप विषे युक्तहैं कदाचित् पापकों प्राप्तहोवें अर्थात् पापकरें तो तिनां तांई विशेषकर्के जप ऊौर हवन आदिक कहाहै ॥ १ ॥

और जो पुरुष केवल नाम करकेहि ब्राह्मणहैं संस्कारतें रहित और मूर्ख और धर्मतेंरहितहैं तिनां ताईं विशेष कर्के कृच्छ्र चांद्रायणादि व्रत देणे योग्य हैं ॥ २ ॥ और धन कर्के युक्त जो पुरुष तिसनें पूर्वोक्त धेनु विंशतिकादिरूप दक्षिणा देणे योग्यहै जो दक्षिणा यत्न कर्के विधान कीतीहै इस प्रकार नर विशेषकर्के क्या जिसकों जैसा उचितहोवे तैसा मनुष्यकों विशेष कर्के प्रायश्चित्तकों पापके दूर करणेवास्ते देवे ॥ ३ ॥ ● इसते अनंतर पर्ण कृच्छ्र कों याज्ञवल्क्य कहताहै पर्णोविति ॥ १ ॥ इसकाअर्थ अपरार्क विषे कहाहै पर्णादीति पलाह और गूलर और कमल औरबिल्व और कुशा इनांके भिन्न भिन्न पत्रांकोंलेकर

नामधारकविप्रायेमूर्खाधर्मविवर्जिताः कृच्छ्रचांद्रायणादीनितेभ्योदद्याद्विशेषतः ॥ २ ॥ धनिनादक्षिणादेयाप्रयत्नविहितातुया एवंनरविशेषेणप्रायश्चित्तानिदापयेदिति ॥ ३ ॥ ※ अथपर्णकृच्छ्रमाह याज्ञवल्क्यः ॥ पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः प्रत्येकंप्रत्यहंपीतैःपर्णकृच्छ्रउदाहृतः ॥ १ ॥ अत्रापरार्कः ॥ पर्णादिपत्रान्तानांकुशानां चैकैकस्यक्काथोदकमेकैकस्मिन्नहनिपीयते इत्येषपंचरात्रसाध्यःपर्णकृच्छ्रः । अत्रापि प्राशनमाहारांतरनिवर्त्तकम् ॥ पर्णः पलाशःराजीवंपद्मंप्रसिद्धमन्यत् विष्णुस्तुपर्णकृच्छ्रमन्यथाह कुशपलाशोदुम्बरपद्मशंखपुष्पीवटब्रह्मसुवर्चलापत्रैः ७ क्वथितस्यांभसःप्रत्यहंपानेपर्णकृच्छ्र इति

काथकरें और तिसकाथके जलकों दिन दिन विषे क्रम कर्के पानकरे तांते एहपर्ण कृच्छ्र व्रत पंजां दिनां कर्के सिद्धहोताहै १ इसविषे प्राशन कहणे कर्के अन्य वस्तुके भक्षण कानिषेधहै ॥ विष्णुजी पर्ण कृच्छ्रकों और ही प्रकार कर्के कहतेहैं कुशा और पलाह और उदुंबर क्या गूलर और पद्म और शंखपुष्पी बूटी और बोड और ब्रह्मसुवर्चला बूटी इनांसत्तां ७ के पत्रांकर्के जलको भिन्न भिन्न काहडे और तिनांके काथके जलको दिन दिन विषे क्रमकर्के पानकरे तां पर्ण कृच्छ्र होताहै इति

जाबालऋषि औरही प्रकार कर्के कहताहै ॥ पलाह और विल्व और पद्म इनांके पत्र और गूलरके पत्र और पिप्पलके पत्र इनांपत्रांकों दिन दिन विषे क्रम कर्के पीवे ॥ १ और पीछे दिन रात्र उपवास करे एह उपवास सहित छे ६ दिनका व्रतहै पूर्वजन्मके पापकों और इस जन्मके पापोंको दूरकरणे वालाहै इति २ ॥ शंख और लिखितजीभी इसमें कहतेहैं पद्म और विल्व और पलाह और गूलर और कुशोदक इनांकों भिन्न भिन्न क्रमकर्के भक्षण करे तां पर्णकृच्छ्र होताहै ॥ और इनां संपूर्णांकों त्रयदिन भक्षणकरे तांभी पर्णकृच्छ्रहोताहै ॥ पहला पांच दिनका दूसरा तीन दिनका ॥ अथयमजीकावचनहै पलेति पलाह और विल्वके पत्र और कुशाऔर पद्म इनांके पृथक पृथक पत्रांकोंग्रहण करे और एक एक वृक्षके पत्रांकों त्रय त्रय

॥ जावालस्त्वन्यथाह ॥ पलाशबिल्वपद्मानांपत्राण्यौदुम्बराणिच अश्वत्थस्यचपत्राणिअशेत्रैकैकशस्तथा ॥ १ ॥ अहोरात्रोपवासश्चपर्णकृच्छ्रःप्रकीर्तितः अन्यजन्मकृतंचैवपापंनाशयतेतुस इति ॥ २ ॥ शंखलिखितौ पद्मविल्वपलाशोदुम्बरकुशोदकान्येकैकमभ्यस्तानि पर्णकृच्छ्रः ॥ समस्तान्येतानित्रिरात्रेणोपभुक्तानि वापर्णकृच्छ्रः । यमः । पलाशविल्वपर्णानिकुशान्पद्मानिवान्यतःएकैकंत्र्यहमश्नीयात्पर्णकृच्छ्रोविधीयतइति १ अन्यतइति पृथगित्यर्थः । अत्र द्विजानांमध्यमानिपत्राणि शूद्रस्येतराणीतिवोध्यमिति यदातु पर्णादीनामेकीकृतानांक्काथ स्त्रिरात्रोपवासांते पीयतेतदापर्णकूर्चः ॥ यथाहयमः ॥ एतान्येवसमस्तानित्रिरात्रोपोषितःशुचिः क्काथयित्वापिवेदद्भिःपर्णकूर्चोऽभिधीयतइति ॥ १ ॥

दिन भक्षण करे एह वारां १२ दिनांकर्के पर्णकृच्छ्र कहाहै ॥ १ ॥ इसविषे ब्राह्मण आदि तीनवर्णोंकों पलाहके मध्यम पत्रे कहेहे अर्थात् ब्राह्मणपलाशके विचले पत्र ग्रहणकरे और शूद्र इतर कया आसपासके पत्रकों ग्रहकरणे ऐसे जानणा इति यदेति जद फेर पलाह और गूलर और कमल और विल्व इनांके पत्रांकों एकत्र कर्के कुशाके जलकर्के काढ़डे और त्रय दिन उपवासकों कर्के पीछे पीवे तां पर्णकूर्च कहाहै जैसे यमजी कहतेहैं त्रय रात्रके उपवास व्रत कर्के शुद्ध होया होया इनां ाह और गूलर और कमल और विल्वके पत्रांकों जलके साथ काथकर्के पीवे तां पर्णकूर्च कहीदाहै इति १

यदेतिजद फेर विल्व आदि फल जलकर्के काहडे होये दिनादिनीवेष कसकर्के पीवे एक मास पर्यंत तां फल कृच्छ्रते आदलेके नामकों प्राप्त होतेहैं ॥ जैसे मार्कंडेयजी कहते हैं फलांके काथकों एकमास पर्यंत पीवे तां बुद्धिमानोनें फलकृच्छ्र कहाहे ॥ और श्रीफल क्या विल्वफल इनांके काथकों एक मास पर्यंतपीवे तां तिसका नाम श्रीकृच्छ्र कहाहै ॥ तैसे पद्मांकेकाथकों एक मास पर्यंत पीवे तिसका नाम पद्मकृच्छ्र कहा है ॥ १ ॥ ऐसे एक मास पर्यंत आमलेके काथ कों पीवे तां एह दूसरा श्रीकृच्छ्र कहाहै ॥ और विशेष कहतेहैं पत्रेरिति पत्रांके काथ क्यां काढ़ेकों पीवे तां पत्रकृच्छ्र हुंदाहे ॥ और पुष्पां कर्के पुष्पकृच्छ्र होताहे ॥ २ ॥ और मूल कर्के मूलकृच्छ्र और केवल जलके काथकों पीवे तां तोय कृच्छ्र कहा है ॥ २ ॥ इसमें एह विचारहे कि

यदातुविल्वादिफलानि प्रत्येकं कथितानि मासंपीयंते तदा फलकृच्छ्रादि व्यपदेशंलभंते । यथाहमार्कंडेयः ॥ फलैर्मासेनकथितःफलकृच्छ्रोमनीषिभिः श्रीकृच्छ्रःश्रीफलैःप्रोक्तःपद्माक्षैरपरस्तथा ॥ १ ॥ मासेनामलकैरेवंश्रीकृच्छ्रमपरंस्मृतम् पत्रैर्मतःपत्रकृच्छ्रःपुष्पैस्तत्कृच्छ्रउच्यते ॥ २ ॥ मूलकृच्छ्रःस्मृतोमूलैस्तोयकृच्छ्रोजलेनत्विति ॥ पत्रकृच्छ्रोत्रउदुम्बरपद्मविल्वपत्रभेदात्त्रिधा। तोयकृच्छ्रोपिकेवलजलकुशोदकभेदाद्विधा ॥ इत्येवमेकादशधापर्णकृच्छ्रइतिमिताक्षराशयः पुष्पकृच्छ्रस्तुपद्मपुष्पजोबोध्यः । मासशब्देनात्रसावनोमासोग्राह्यः तदुक्तंकालनिर्णये ॥ आयुर्दायविभागश्चप्रायश्चित्तक्रियातथा सावनेनैवकर्तव्याशत्रूणांवाप्युपासनेति १

अष्टप्रकारके कृच्छ्र जों दिखाएहैं तिनांविचों पत्रकृच्छ्र त्रय तरहांकाहे ॥ और जल कृच्छ्र दो प्रकारकाहे इसतें ११ प्रकार कृच्छ्रके होए एह मिताक्षरा ग्रंथका आशयहे और मूलमे अर्थ स्पष्टहे ॥ और विशेषकतेहैं मासेति मासशब्दके कथन करणे कर्के तीस ३० दिनांका महीना इसजगा ग्रहण करणे योग्यहे और चांद्रमास नहि जानणा इसका निर्णय कहा है कालनिर्णय ज्योतिश्शास्त्र विषें ग्रहांके अनुसार कहा जो आयुर्दाय विभाग सो तीस ३० दिनर्के मासते जानणा तैसे प्रायश्चित्तका करणा और शत्रुयांकी उपासना केदी आदिक अथवा विनांकी हानि वास्ते अनुष्ठानादि भी तीस दिनके मास कर्के जानणे योग्यहे ॥ १ ॥

अब देवलऋषिका वचनहै हेब्राह्मणा विषे श्रेष्ठो पर्णकृच्छ्र नाम करकेंजो व्रतहै तिसकोंश्रवण करो जो अतिशय करकें श्रेष्ठ है और संपूर्ण पापोंके दूर करणे वाला और संपूर्ण दोषांके नाश करणे वाला है ॥ १ ॥ अब दोषां करकें युक्त जो पाप हैं अर्थात् जिनां पापां देभोगते पीच्छे क्षयादि रोग हुंदेहै तिनको कहतेहां तिनांकों हि पर्णकृच्छ्र व्रत दूर कर्त्ताहै ब्रह्महेति ब्राह्मणके मारणे वाला पुरुष क्षय जो श्वासकास रोग तिस करकें युक्त होताहै और मदिरा के पीणे बाला जो है तिसके काले दांत होतेहैं और जो सुवर्णकी चोरी कर्त्ताहै तिसके कुनख क्या निंदितनख होतेहैं और गुरुकी स्त्री साथ जो विषय भोगताहै सो कुष्टी होताहै ॥ २ ॥ अन्नेति और अन्नकों चुराणे बाला उदर विषे रोग युक्त होताहै ॥ और शाकके चुराणे वाला दर्दुर क्या डड्डू होताहै और धान्य क्या धाइयां चुराणे वालयांकों हे ब्राह्मणां खरक रोग होताहै ॥ ३ ॥ ताम्रेति तांबेके

देवलः ॥ पर्णकृच्छ्रंद्विजश्रेष्ठाःशृण्वन्तुपरमंशुभम् ॥ सर्वपापप्रशमनं सर्वदोषोपशान्तिदम् ॥ १ ॥ ब्रह्महाक्षयरोगीस्यात्सुरापःश्यावदंतकः स्वर्णस्तेयीचकुनखीदुश्चर्मागुरुतल्पगः ॥ २ ॥ अन्नहर्त्ताभवेद्गुल्मी शाकस्तेयीतुदर्दुरः स्तेयिनांधान्यहारीणांकंडूतिःसंततांद्विजाः ॥ ३ ॥ ताम्रस्तेयीदीर्घवृषणःप्रमेहीपर्वमैथुनी शिरोव्रणीस्नानहीनःपित्तवांस्त्रपुसीसहा ॥ ४ ॥ गजचर्मानागहन्ताश्वहन्तामहाव्रणी कंठभूषणहारी स्याद्गंडमालीभवेद्भुवि ॥ ५ ॥ रक्तप्रमेहीमनुजोपुष्पवत्यंगनागमः भगिनीगमनोभूमौमधुमेहीभवेन्नरः ॥ ६ ॥ मातुःसपत्नींभगिनींजभत्कामातुरोनरः सपापमनुभूयाशुरोगीभूयाद्भगंदरी ॥ ७ ॥

चुराणे वालेके षतालू लंबे होतेहैं और संक्रांति आदिक पर्व विषे जो मैथुन कर्त्ताहै सो प्रमेहरोग करकें युक्त होताहै ॥ और स्नानतें रहित जो है सो शिर विषे व्रणवाला होताहै और लाख और सिक्केके चुराणे वाला पित्त रोग युक्त होताहै ॥ ४ ॥ गजेति हाथी के वध करणे करकें हाथीकी न्याईं चर्म वाला होताहै ॥ और घोडेके वध करणे वाला देह विषे बहुत व्रण युक्त होताहै ॥ और कंठके भूषण हरण वालेकों हजीरांरोग होताहै ॥ ५ ॥ रक्तेति ऋतुमती स्त्री के साथ जो गमन कर्त्ताहै सो रक्तप्रमेहरोग करकें युक्त होताहै ॥ और जो भगिनी विषे गमन कर्त्ताहै सो मधुप्रमेहरोग करकें युक्त होताहै ॥ ६ ॥ मातुरिति दूसरी माताके साथ और माताकी भैणके साथ जो गमन कर्त्ता है सो तात्काल भगंदररोगकरकें युक्त होताहै ॥ ७ ॥

स्वसारमिति जो पुरुष भैणविषे गमन कर्ताहै सो मूत्र कृच्छ्र रोगकर्के युक होताहै । और गौके मारणेवाला महापापी पुरुष सदा पृथ्वीविषे रोगी होताहै ॥ ८ ॥ गवितिं गौकेबच्छेके मारणेतें गुदाविषे मंमसी रोगकर्के युक होताहै । और शिवजीके निर्माल्यकों जो भक्षण कर्ताहै सो कफ रोगकर्के युक होताहै ॥ ९ ॥ अजीति जो पुरुषों विषे कठोरताकों अथवा छलको कर्ताहै सो उदर विषे अजीर्ण रोगी होताहै शठ कृत् इस जगा (छलकृत्) ऐसा भी पाठ है और गृहकों दाहकरणे वाला शूलरोग युक्तहोताहै और बंदि ग्रहणजदोषसें अर्थात् जो बिना अपराध किसीकों कैदकर्ताहै सो श्वासकासरोगवाला होताहै १० ॥ जो स्त्री विषांकर्के बालककों मारतीहै तिसका गर्भ सदाहि स्रव जाताहै ॥ और जो स्त्री अन्यपुरुषके साथगमन कर्तीहै सो स्तनांविषे फोडेवालीहोतीहै ११ क्षीरमिति जस्त्री दुग्धकों चुरावैहि सो दूसरेंजन्मविषे स्तनां

स्वसारंयःपुमान्गच्छेज्जायतेमूत्रकृच्छ्रवान् धेनुहन्तामहापापीसदारोगी भवेद्भुवि ८ गोवत्सहननान्मर्त्यःसभूयादर्शवान्भुवि शिवनिर्माल्यभुक्पापी जायतेकफवान्नरः ॥ ९ ॥ अजीर्णरोगीशठकृद्गृहदाहीचशूलवान् वंदिग्रहणजाद्दोषाज्जायतेश्वासकासवान् ॥ १० ॥ स्रवद्गर्भाभवेत्सातुवालकंहन्ति याविषैः अन्यमालिंगतेनारीसावैस्फोटस्तनीभवेत् ॥ ११ ॥ क्षीरंमुष्णातियानारीस्तन्यहीनान्यजन्मनि पतिव्रतापहारीचवृषणव्रणरोगवान् १२ विधवासंगजाद्दोषाच्छिश्नदेशव्रणीभवेत् पुष्पस्तेयीविकनासःकोशस्तेयीतुपेटवान् ॥ १३ ॥ गन्धस्तेयीचदुर्गन्धःक्रमुकेसततंज्वरी विवाहविघ्नकृन्मर्त्योजायतेहीनदारवान् ॥ १४ मयूरहननान्मर्त्योजायतेकृष्णविंदुकःतडागारामविच्छेदीसदादुःखीभवेन्नरः ॥ १५ ॥ इत्येवमादयोदोषामहानरकदान्नृणाम् एतेषांशोधनार्थायपर्णकृच्छ्रंसमाचरेत् ॥ १६ ॥

में दुग्ध रहितहोतीहै और जो पुरुष पतिव्रतास्त्रीकों हरताहै सो पताल्यांविषे छिद्रवाला होताहै १२ ॥ विधवेति विधवास्त्रीविषे संग करणेतें लिंगविषे छिद्रकर्केयुक होताहै । और पुष्पांके चुराणे वाला फीना होताहै और खजाने चुराणेवाला जलोदर रोग वाला होताहै १३ गंधेति सुगंधिवाली वस्तुके चुराणे वाला वगड गंधवाला होताहै और सुपारीके हरणेवाला सदाज्वर रोगयुक होताहै और किसेके विवाह विषे जो विघ्न कर्ताहै सो स्त्रीतें रहित होताहै १४ मयूरेति मोरके मारणे वाला जोहै तिसके देह विषे कालीयां बिंदु होतीयांहैं और तला और बाग इनांके नाश करणेतें सदादुःखी होताहै १५ इसतें आदलेके जो दोष हैं सो पुरुषांकों महानरककेदेणे वाले कहेहैं इनांदोषांके दूर करणे वास्ते पर्ण कृच्छ्र व्रत कों करे ॥ १६ ॥

अवमार्कंडेयजीका वचनहै ॥ महेति महांपापांके जो समूहहैं और लघु जो पापहैं पृथ्वीविषे आर्द्र क्या इच्छा करके जो पापकीतेहैं और इच्छातें विनाकीतेहैं अथवा आर्द्रक्या अरकालके कितेहोए पाप और शुष्क क्या चिरकालके कीते होय पाप एह अर्थहै तिनां संपूर्णांकों शुद्ध करणे वाला पर्ण कृच्छ्र व्रत कहाहै ॥ १ ॥ अव पराशरजीका वचनहै ॥ पर्णेति ब्राह्मण पर्ण कृच्छ्रके करण विषे मध्यम पत्र ग्रहण करे वारां दिन पर्य्यंत नित्यशुद्धहोकर तिलककों धारणकर्के ॥ १ ॥ पूर्वकी न्यांई गंध पुष्प आदिकां कर्के विष्णुकों पूजे जद सूर्य अस्त होवे तां पलाहके तीन पत्रांकर्के तीन डूनेवनावे ॥ २ ॥ और वेदके पठनकरणेविषे युक्त जो ब्राह्मण तिनांके तीन गृहांविषे जाकर तीनडूनयांविषे भिक्षात्रयकों ग्रहणकरे ॥ ३ ॥ एक भिक्षाका डूना विष्णुकेतांई अर्पणकरे और एक

॥ मार्कण्डेयः ॥ महापातकजालानांल्घूनांभुविजन्मनाम् आर्द्राणांचैवशुष्काणांपर्णकृच्छ्रंविशोधनम् ॥ १ ॥ पराशरः ॥ पर्णकृच्छ्रस्यपर्णानिमध्यमानिद्विजोत्तमः द्वादशाहानिपर्यन्तंनित्यंशुचिरलंकृतः ॥ १ ॥ पूर्ववद्विष्णुमभ्यर्च्यरविरस्तंगतोयदा त्रिभिःपत्रैर्ब्रह्मभूतैःकृत्वाचैवपुटत्रयम् ॥ २ त्रीणिवेश्मानिविप्राणांवेदाध्ययनशीलिनाम् भिक्षात्रयंसमानीयत्रिषुपत्रपुटेष्विह ॥ ३ ॥ एकंपुटंतुदेवायविप्रायैकंसमर्पयेत् अवशिष्टंतदाश्नीयाद्धरिनामपरायणः ॥ ४ ॥ स्वपेद्देवसमीपेतुसंचितंमनसास्मरन् ततःप्रभातवेलायांपूर्ववत्सकलंचरेत् ॥ संचितंपापमित्यर्थः ॥ ५ ॥ विप्रायदेयागोरेकापंचगव्यंपिवेत्ततः पर्णकृच्छ्रमिदंभूपशोधनंपापकर्मणाम् आचरणमात्रेणचान्द्रायणफलंलभेत् ॥ ६ ॥

तिसका डूनाब्राह्मण तांई अर्पणकरे और तीसरे डूनेंको आप भक्षण करे और विष्णुके नामका युक्तहै करे ॥ ४ ॥ और विष्णुकीमूर्त्तिके समीपशयनकरे संचित जो पापहै तिसका मनकर्के स्मर महांत ने एह पापकीताहै ॥ ५ ॥ ऐसे वारां दिनके व्रततें अनंतर प्रातःसमयविषे पूर्वकी न्यांई ये होयेंमकों कर्के ब्राह्मणके तांई एक गौ देवे और तिसतें अनंतर पंचगव्यका पानकरे एऔर कृच्छ्र हेराजन् पापकर्मोंके शुद्ध करणे वालाहै जिसके करणे कर्के पुरुष चांद्रायणके इसफलों प्राप्त होताहै ॥ ६ ॥

इसतें उपरंत पर्णकृच्छ्र व्रतका वदला देवलऋषि कहताहै पर्णेति हेराजर्षे तेरे ताई पर्ण कृच्छ्र व्रतके वदले नूं कहताहां केसा बदलाहै संपूर्ण पापांके दूर करणे वाला और संपूर्ण उपद्रवांके नाशकरणे वालाहै ॥ १ ॥ और मनुष्योंकों संपूर्ण कामना फलकों देणेवाला और संपूर्ण कृच्छ्र व्रतांकेफल देणे वाला सो कहतेहां पांच ५ गौयां पंजां ब्राह्मणांके ताईं भिन्न भिन्नदेवे कैसीयां गौयांहैं वस्त्र आदि शोभाकर्के युक्त और वछयांके सहित हैं ॥ २ ॥ और सुवर्णके हैं शृंगजिनां के और रुप्येकेखुरां कर्के युक्त और दोहनकरणेके लिये कांसपात्रकर्के युक्त और सुशीला और जुवाण ऐसीयांविप्रांकोंदेणेयोग्यहैं एह प्रत्याम्नाय पर्णकृच्छ्रका बहुतश्रेष्ठ कहाहै ३ ● इसतें उपरंत

अथपर्णकृच्छ्रप्रत्याम्नायमाहदेवलः ॥ पर्णकृच्छ्रस्यराजर्षेप्रत्याम्नायंवदामि ते सर्वपापस्यशमनं सर्वोपद्रवनाशनम् । १ । सर्वकामप्रदंन्हणांसर्वकृच्छ्र फलप्रदम् पंचगावः प्रदातव्याः सालंकाराः सवत्सकाः ॥ २ ॥ हेमशृं ग्योरौप्यखुराः कांस्यदोहनसंयुताः ॥ साधुशीलायुवत्यश्च विप्रेभ्यश्च पृथक्पृथक् ॥ पर्णकृच्छ्रस्यविप्रर्षेप्रत्याम्नायोमहत्तरः ॥ ३ ॥ ● अथफल कृच्छ्रलक्षणम् । तत्रदेवलः ॥ फलकृच्छ्रस्यदेवर्षे लक्षणंकथितंमया शृणु ब्रह्ममुनेचित्रंसर्वपापप्रणाशनम् ॥ १ ॥ येमातृघातिनोलोकेतथैवपितृ घातकाः येवास्युर्भ्रातृहंतारस्तेषामेषाविनिष्कृतिः ॥ २ ॥ येवागर्भविभे त्तारोयेवास्युर्गरदायिनः येवाग्रामविभेत्तारोयेवाकुलजभेदिनः ॥ ३ ॥ येपीहपिशुनालोकेयेवास्युःस्तेयिनः सदा येवाबालविभेत्तारस्तेषां [illegible] ॥ निष्कृतिः ॥ ४ ॥

फलकृच्छ्रके लक्षणनूं कहतेहां तिसविषे देवलजीका वचनहै फलेति हेदेवर्षे फलकृच्छ्रका लक्षण मैंनेकथनकरीदाहै हेब्रह्ममुने तूं श्रवणकर वडाआश्चर्यहै उौर संपूर्ण पापांके नाशकरणे वालाहै १ ॥ इसकर्के दूर होणेवाले पापोंकों कहतेहां यइति जो पुरुषमाताका और पिताका और भ्राताका वधकर्तेहैं तिनोंकी शुद्धिकर्ताहै ॥ २ ॥ और जो गर्भपात करतेहैं और विषदेतेहैं और नगरांकों लूटतेहैं और कुलविषे संवधीयांका नाशकरतेहैं ॥ ३ ॥ और जो लोकविषे चुगली करतेहैं उौर सदा चोरीकरतेहैं औरबालकांकों मारतेहैं तिनांसंपूर्णांकी शुद्धि देणेवाला एह व्रत है ॥ ४ ॥

याइति जो स्त्रीयां भर्त्तांकों त्यागके अन्य पुरुषां विषे गमन करतीयां हैं तिनां स्त्रीयांकी शुद्धि वास्ते पूर्व ब्रह्माजीने फलकृच्छ्र व्रत रचीदाहोया ॥ ५ ॥ ब्रह्मस्वेति ब्राह्मणांके धनकों जो नाशक रतेहैं अथवा होरीपासों नाशकरवातेहैं और जोलोकविषे खेतीयांकोंचुरातेहैं तिनांकी फल कृच्छ्र व्रत कर्के शुद्धि कहीहै ॥ ६ ॥ उच्छिष्टेति जो पुरुष किसेके जूठे अन्नकोंभक्षणकरतेहैं और झूठा वाद करतेहैं और मुरदेकों उठाकर हरतेहैं इसमें शवका हरणा मंत्रसिद्धि वास्ते अथवा चिकित्साके जानणे वास्तेहै तिनांकी कृच्छ्रव्रतकर्के शुद्धि कहीहै ॥ ७ ॥ मद्येति जो मदिराके पीनेविषे नित्ययुक्तहैं और नित्यकर्म जो संध्यावंदनादि तिनांका नाशकरतेहैं और पितरांके निमित्त जो श्राद्ध

याश्चनार्य्यः पतिंत्यक्त्वारमंतेऽन्यान्नरान्यदि तासामपिविशुद्ध्यर्थंपुरासृष्टं स्वयंभुवा ॥ ५ ॥ ब्रह्मस्वघातिनोनित्यंब्रह्मस्वानांचघातकाः क्षेत्राणांहारिणोलोकेतेषामेतद्धिनिष्कृतिः॥ ६॥ उच्छिष्टभोजनायेचयेचमिथ्यापवादिनः येवैकुणपहर्त्तारस्तेषामेतद्धिनिष्कृतिः ॥ ७ ॥ मद्यपानरतानित्यंनित्यकर्मविभेदिनः पितृश्राद्धविभेत्तारस्तेषामेतद्धिनिष्कृतिः ॥ ८ ॥ महापातकयुक्तोवायुक्तोवासर्वपातकैः कृच्छ्रेणैतेनमहतासर्वपापैःप्रमुच्यते॥९॥ महांतः पापकर्म्माणोमहापापहताःसदा एतेनकृच्छ्रराजेनपुनंतिसततंद्विजाः फलकृच्छ्रंमहापापहारिसंपत्प्रवर्धनम् ॥ १० ॥ दिनादिनेमुनींद्राश्चकृत्वैतच्छुद्धिमाप्नुयुः ॥ ११ ॥

तिसका खंडनकरतेहैं तिनापुरुषांकी फलकृच्छ्रव्रतकर्के शुद्धि कहीहै ॥ ८ ॥ महेति जो महापापकर्के युक्तहै वा संपूर्ण होरना पापांकर्के युक्तहै इस वडे फल कृच्छ्र व्रतके करणेकर्के शुद्धहोंताहैं ॥ ९ ॥ महांतइति जो ब्राह्मण आदि वर्ण हैं महापापांके करण वाले हैं और महापापां कर्के हत होये होये इसकृच्छ्र राज कर्के पवित्र होतेहैं एह फल कृच्छ्र व्रत महापापांके नाशकरणे वालाहै और संपदाके वधाणे वालाहै ॥ १० ॥ इसमे संप्रदाय कहतेहैं दिन इति दिन दिनविषे मुनींद्र इसफल कृच्छ्रके करणे करके शुद्धहोंते होये । ११ ।

कायेति एह फलकृच्छ्र देहको शुद्धकर्त्ताहै और संपूर्ण कृच्छ्र फलांकोदेताहै और संपूर्णपापांका नाशकर्त्ताहै एहफलकृच्छ्रवडा श्रेष्टहै १२ प्रातरिति प्रातःकालविषे स्नानकर्के देहकी शुद्धिवास्ते पूर्वकीन्याई मृत्तिकादिसें स्नानकर्के शुद्धहोया गायत्रीका जप सूर्यके अस्ततांई सारादिन करे ॥ १३ ॥ तावदिति तां व्रती पुरुष मनको स्थिरकर्के नित्यकर्मको समाप्तकरे विधि कहतेहैं कि केलेका एक फल विष्णुकेतांई अर्पण करे ॥ १४ ॥ और तिस फलको पूर्व भक्षणकरे मौनको धारके व्रत विषे स्थित होया होया वीर्यसंपूर्ण अर्थात् पकेहोवे फल भक्षण करे जो शुष्क न होण और कच्चे और चिरकालके त्रुटित न होण ऐसे त्रय फल भक्षणकरे ॥ १५ ॥ और

कायशुद्धिप्रदंकृच्छ्रंसर्वकृच्छ्रफलप्रदम् सर्वपापहरंचेदंफलकृच्छ्रमहत्तरम् ॥ १२ ॥ प्रातःस्नात्वाशुचिर्भूत्वापूर्ववच्छुद्धिहेतवे तावज्जपन्सदातिष्ठे द्यावदस्तंगतोरविः ॥ १३ ॥ तावद्व्रतीस्थिरमनानित्यकर्मसमापयेत् कदलीफलमेकंचविष्णवेतन्निवेदयेत् ॥ १४॥ तदेवभक्षयेत्पूर्वंव्रतस्थो मौनपूर्वकम् एकैकवीर्यसंपूर्णंभक्षयित्वाफलत्रयम् ॥ १५ ॥ एतद्वनफलैर्विना ॥ एवंद्वादशरात्राणिस्वपेन्नारायणाग्रतः गोंदेयाविप्रवर्य्याय ब्रह्मकूर्चंपिवेत्ततः ॥ १६ ॥ फलकृच्छ्रमिदंसर्वंकथितंब्रह्मणोदितम् ॥ कृच्छ्रस्यैतस्यमाहात्म्यान्नश्यत्येवमहद्भयम् ॥ १७ ॥ अथफलकृच्छ्रप्रत्याम्नायः ॥ देवलः कृच्छ्रस्यैतस्यमुनयःप्रत्याम्नायंमहोन्नतम् शृण्वंतुसर्वपापघ्नंसर्वश्रेयःप्रदंनृणाम् ॥ १ ॥

वनकेफलांको न ग्रहणकरे इसप्रकार बारांदिन १२ व्रतकरे और नारायणके समीप शयनकरे और श्रेष्ट ब्राह्मणके तांई एक गौ देणयोग्यहै तिसतें पीछेब्रह्मकूर्च पीवे ॥ १६ ॥ एह फलकृच्छ्र व्रत ब्रह्माजी कर्के कथित क्या किहाहोयाथा सो मैंने तुमको कहाहै इस कृच्छ्रके माहात्म्यतें महाभय नष्टहोताहै ॥ १७ ॥ इसतें उपरंत फल कृच्छ्रका प्रत्याम्नायहै तिसके वदले विषे देवलजीकावाक्यहै कृच्छ्रेति हेमुनीश्वरहो इस कृच्छ्रके उत्तम वदलेको श्रवण करो जो पुरुषांके संपूर्ण पापांके दूरकरणे वाला और संपूर्ण कल्याणांके देणेवालाहै ॥ १ ॥

पुरेति पूर्व गालवनामें ऋषि ब्रह्महत्याके भय कर्के युक्त होया होया संपूर्ण लोकांके हितकी इच्छावाले जो विष्णु तिनांकी शरणकों प्राप्तहोताभया ॥ २ ॥ हे भगवन् लोकांके हित की इच्छावाला जो तूंहैं तेरेकर्के मै अनुग्रह करणे योग्यहां हे देवतयांके देव हे इंद्रआदिकांके स्वामी तुसांके चरणांकी शरणकों प्राप्त होयां जो मैं मेरी रक्षाकरो ॥ ३ ॥ कैसे हौंतुसी जो पुरुष तुसांके नामकों स्मरण कर्ताहै तिसके जो ब्रह्महत्या आदि पापहैं तिनांके नाशकरणेवाले हो इसकारणतें हेपुरुषोत्तम मैंनें तुमांके चरण देखेहैं ॥ ४ ॥ ब्राह्मणकी हत्या जो बडी मेरेदेह विषे हे प्रभो स्थितहै सो तूं दूरकर मेरे देहको जलातीहै जैसे शुष्क लकडीकों अग्नि शीघ्रता

पुराहिगालवोनामब्रह्महत्याभयातुरः विष्णुंशरणमापेदेसर्वलोकहितैषिणम् ॥ २ ॥ अनुग्राह्योस्मिभगवंस्त्वयालोकहितैषिणा रक्षमांदेवदेवेशत्वदंघ्रिशरणागतम्॥ ३ ॥ ब्रह्महत्यादिपापानांस्मरणान्नाशहेतुकम् अतस्त्वत्पादयुगलंदृष्टंमेपुरुषोत्तम ॥ ४ ॥ विप्रहत्यामहत्यासीन्मयितांनुदहेप्रभो ज्वरयत्याशुसादेहंवह्निःशुष्केंधनंयथा ॥ ५ ॥ नास्तिनिंदासमंपापं नास्तिक्रोधसमोरिपुः नास्तिमोहसमःपाशोनदेवंकेशवात्परम् ॥ ६ ॥ विष्णुः ॥ नास्तिक्रोधसमोमृत्युर्नास्त्यकीर्तिसमाक्षतिः नास्तिकीर्त्तिसमोधर्म्मस्तपोनाऽनशनात्परम् ॥ १ ॥ प्रत्यहंत्रिषवणंस्नानंकृत्वामांमनसिस्मरन् फलकृच्छ्रंपुराकृत्वाह्यशक्तोयदिगालव ॥ २ ॥

से जला देतीहै ५ सभ देवतां सें अधिकता विष्णुजीको है एह कहतेहैं नास्तीति निंदाके तुल्य होरकोई पूर्णफलदाता पाप नहिहै और क्रोधके समशत्रु नहि और मोहके तुल्य फाहे नहि और विष्णुतें परे देवता नहि ६ विष्णुजीकावचनहै नेति क्रोधके तुल्य होरकोई मृत्यु नहि किसे जगा (क्रोधके तुल्य होर कोई शत्रु नहि ऐसापाठहै) और अयशतें और कोई हानि नहि कही क्या अपयशहि हानि है और यशके तुल्य होर धर्म नहि और निराहारतें परे तप नहि १ अब फेरप्रसंगकोकहतेहैं प्रेति दिन दिन विषे त्रय कालस्नान करें मेरे को स्मरणकर्त्ताहोया ऐसे फल कृच्छ्रको करके पुरुष शुद्धहोताहै एहअगेसाथ संबंधहै और हेगालव जोपुरुष फलकृच्छ्रके करणे विषें सामर्थ्यतें रहितहै सोजिसको अगे करणाहै तिसको करे एहअर्थहै

लोपुरुष इसप्रत्याम्नायनूं करणेकर्के पापतें शुद्धहोताहै उोर गोकीपूजा भली प्रकारकरे धूप दीप कनैवेद्यकर्के युक्त ॥ ३ ॥ और पूजनतें पीछे प्रदक्षिणाकर्के और नमस्कारकोंकर्के श्रेष्ठ ब्राह्मण तांई गोदेवे कैसीगी है जो सहित बछेके है और दुग्धदेणे वाली और फलकृच्छ्रके वदलेकर्के फलके देणेवालीहै ॥ ४ ॥ ऐसे दानकर्के फलकृच्छ्रके संपूर्णफलकों प्राप्तहोताहै तां हे ब्राह्मणां विषे श्रेष्ठ ऐसे व्रतनूं कर तिसीक्षणमें तूं पवित्रहोवेंगा ५ ऐसेविष्णुकर्के आज्ञाकों प्राप्तहोयाहो या और प्रत्याम्नायनूं करताहोया योगीयांकोंभी दुर्लभ जो सिद्धि है तिसनूं प्राप्तहोया ॥ ६ ॥ ० अबपराक कृच्छ्रकहीदाहै तिसविषे मनुजीका वाक्यहै यतेति मनकों रोकके और प्रमादतें रहित

प्रत्याम्नायमिमंकृत्वाशुद्धोभवतिपातकात् गोपूजासाधुसंयुक्ताधूपदीपनिवे दनैः । ३ ॥ परिक्रम्यनमस्कृत्यसवत्सांपयसावृताम् योदद्याद्विप्रवर्य्यायप्र त्याम्नायफलप्रदाम् ॥ ४ ॥ सम्पूर्णफलकृच्छ्रस्यह्यखंडंलभतेनरः एवंकुरु ष्वविप्रर्षेपूतोभवसितत्क्षणात् ॥ ५ ॥ इत्याज्ञप्तस्तदातेनप्रत्याम्नायंतदा चरन् सिद्धिमाप्नोतिमहतींयोगिनामपिदुर्लभाम् ॥ ६ ॥० अथपराककृच्छ्रम् तत्रमनुः ॥ यतात्मनोऽप्रमत्तस्यद्वादशाहमभोजनम् पराकोनामकृच्छ्रोयं सर्वपापप्रणोदनः ॥ १ ॥ याज्ञवल्क्यः ॥ द्वादशाहोपवासेनपराकःपरिकी र्तितः । देवलः । अथवक्ष्यामिकृच्छ्रस्यपराकस्यमहात्मनः सर्वदोषनिवृ त्तिःस्यात्सर्वशास्त्रानुवर्तिनः ॥ १ ॥ पराकःकृच्छ्रइत्युक्तोविष्णुनाप्रभवि ष्णुना यदाचरणमात्रेणसर्वपापैःप्रमुच्यते ॥ २ ॥

हाके जोवारां १२ दिन भोजनका त्याग करणा एह संपूर्ण पापांके नाशकरणे वाला पराकनाम कर्केकृच्छ्रकहाहै ॥ १ ॥ तिसविषे याज्ञवल्क्य जीकावचनहै इतिबारां १२ दिनांके उपवास व्रतकर्के पराक कृच्छ्रकहाहै ॥ अब देवलजीकावाक्यहै इसतें उपरंत पराक कृच्छ्रकों कहताहां संपूर्ण शास्त्रोंकर्के वर्तनवाला जो पुरुष है तिसके संपूर्ण पापांकी निवृत्ति होतीहै पराक व्रतकर्के १ ॥ ऐसेविष्णु जो प्रभविष्णु हैं तिनांनें पराक कृच्छ्र कहाहै जिसके करणेकरके संपूर्ण पापांतें रहितहोवाहै ॥ २ ॥

जेडेपाप इसककें दूर हुंदेहैं तिनको कहतेहैं ब्रह्मेति ब्रह्महत्यापाप और मदिराके पीणे का पाप और सुवर्णके चुराणेका पाप और गुरोंकी स्त्री विषे गमन करणेका पाप और तिनांका संसर्ग और तिनाके तुल्यपाप ॥ ३ ॥ और संकलीकरणपाप और मलिनी करण और उपपातक एह नौ ९ प्रकारकापाप कहाहै ॥ ४ ॥ तुलेति तुलादान और हिरण्यगर्भ और ब्रह्मांड और घटदान और पंचलांगलक और पृथ्वीदान ॥ ५ ॥ और विश्वचक्र और कल्पलता और सप्तसागर और चर्म धेनु महती और महाभूतघट तैसे हि एह दान ॥ ६ ॥ और कालचक्र और राशिचक्र और इसतें अनंतर विश्वचक्र और लक्षकोड तिलांकर्के हवन करणा

ब्रह्महत्यासुरापानंस्तेयंगुर्वङ्गनागमः तत्संसर्गोपिपंचैतेह्यनुपातकनामकम्
३ संकलीकरणंचैवमालिनीकरणंतथा उपपातकमित्येतन्नवधापरिकीर्त्तितम्
४ तुलाहिरण्यगर्भश्चब्रह्माण्डोपिघटस्तथा पंचलांगलकंचैवधरादानमतःपरम्
५ विश्वचक्रंकल्पलतासप्तसागरमेवच चर्मधेनुश्चमहतीमहाभूतघटस्तथा
६ कालचक्रंराशिचक्रंविश्वचक्रमनन्तरम् कोटिलक्षतिलैर्होमोद्विमुखीसुर
भिस्तथा ७ आर्द्रकृष्णाजिनंचैववेंकटेपर्वसंगमे छागादिपंचकंचवतथैवदश
धेनवः ८। तथादशमहादानान्यचलाःसप्तनामकाः रहस्यकृतपापानिब्रह्म
हत्यादिकानिच ९॥ पापानांनवविधानामितरेषांमुनीश्वराः तुलादिसंग्रहा
त्हणांपराकःकृच्छ्रनामकः ॥ १० ॥ सर्वपापहरोन्हणांदेवानांचप्रियंकरः
सर्वेष्वेतेषुकृच्छ्रेषुमहान्प्रोक्तःस्वयंभुवा ॥ ११ ॥

और प्रसूत समयविषे गौका दान ॥ ७ ॥ और कृष्णहरिणका आर्द्र चर्म और वेंकट तीर्थविषे पर्वके होयां २ बकरेतें आदिलेकरके पंच अर्थात् बकरा १ भेडा २ गौ ३ महिषी ४ घोडा ५ इनका दान और दश धेनु दान॥ ८ ॥ और सत्त ७ पर्वतदान और गुप्तपाप और ब्रह्महत्यादि पाप॥ ९ ॥ तुलाआदि दानांको जो ग्रहण कर्तेहैं तिनांके पापनूं और नौ प्रकारके जो पापहै इसतें इतर जो पापहैं तिनां संपूर्णांकों शुद्ध करणेवाला पराक कृच्छ्र नामकर्के व्रतहै ॥ १० ॥ और पुरुषांके संपूर्ण पापांके नाश करणे वाला और देवतयांकी प्रीति करणे वाला ब्रह्माजीनें संपूर्ण कृच्छ्र व्रतोंविषे एह पराककृच्छ्र व्रत श्रेष्ठ कहाहै ॥ ११ ॥

अब गौतमजीका वाक्य है प्रत्यहमिति वारां १२ दिनपर्यंत दिन दिनविषे एक छटांकपरिमाण गौके घृतमात्रकों पीकेकर्के ब्राह्मण शुद्धिकों प्राप्त होताहै एह पराक नामक व्रतसंपूर्ण पापांके नाश करणे वाला प्रसिद्ध है ॥ १ ॥ और संपूर्ण पापांके और उपद्रवांके नाश करणे वाला और संपूर्ण स्वर्गादि लोकगतिके देणे वालाहै एह निश्चयकर्के विश्वके धारणे वाले हरि जी भगवान् सो आप कहते भये ॥ २ ॥ और स्मृतिविषेभी कहाहै दिन दिनविषे वारां १२ दिन पर्यंत एक १ छटांकी परिमाण गोघृतके पीणेकर्के ब्राह्मण संपूर्ण पापांतें शुद्धिकों प्राप्तहोताहै हे द्विज इसतें विना शुद्धि नहि ॥ ३ ॥ लौगाक्षिऋषिनेंभी कहाहै देति वारां १२ दिन एक छटांको गौकेघृतकों अग्निमे तपाकर पीवे तां पुरुषसंपूर्ण पापांतें रहितहोताहै और शुद्धिकों प्राप्तहोताहै ॥ १ ॥ अबप

गौत्तमः। प्रत्यहंघृतमात्रंचद्वादशाहंगवोद्भवम् पीत्वापलंद्विजःशुध्येत्पराक इतिविश्रुतः १ ॥ सर्वपापप्रशमनः सर्वोपद्रवनाशनः सर्वलोकप्रदोह्यो ह्भगवान्हरिर्विश्वधृक् ॥ २ ॥ स्मृत्यंतरे ॥ प्रत्यहंगोघृतंविप्रोद्वादशाहं पलंमुदा पीत्वाशुद्धिमवाप्नोतिपापेभ्योनान्यथाद्विजइति ॥ ३ ॥ लौगाक्षिणाप्युक्तम् । द्वादशाहंघृतंतप्तंपलमात्रंगवामिव पीत्वाशुद्धिमवाप्नोतिसर्वपापैःप्रमुच्यते ॥ १ ॥ अत्रेवशब्दएवकारार्थः अयमेवपराकः ॥ अथ पराककृच्छ्प्रत्याम्नायः ॥ देवलः ॥ प्रत्याम्नायंपराकस्यवक्ष्याम्यहमनुत्तमम् सर्वपापोपशमनंसर्वपापनिकृंतनम् ॥ १ ॥ व्यासः ॥ पराकंनामयत्कृच्छ्रंतत्कर्तुंमनुजोत्तमः अशक्तस्तस्यकृच्छ्रस्य प्रत्याम्नायंसमाचरेत् ॥ १ ॥ यस्याचरणमात्रेणपराकस्यफलंलभेत् प्रत्याम्नायंगवांदद्या द्दशपंचसवत्सकम् सर्वपापविनिर्मुक्तःप्रयातिपरमंपदम् ॥ २ ॥

राककृच्छ्रका वदलाहै तिसविषे देवलऋषिका वाक्यहै प्रेति पराककृच्छ्रके उत्तमप्रत्याम्नायकों कहताहां कैसा प्रत्याम्नाय जो संपूर्णपापांके नाश करणे वाला और संपूर्ण पापांके छेदन करणे वालाहै इसमे एह अभिप्रायहै कि लघुपापोंका नाश और महापापोंका एक कर्के घाटा होताहै और बहुतयोंकर्के सभकानाश होजावेगा ॥ १ ॥ अब व्यासजीकावचनहै पराकमिति पराक नाम कर्के जो कृच्छ्र है तिसके करणेविषे पुरुष असमर्थ होवे तां तिसके प्रत्याम्नायनूं करे जिसके करणे कर्के पराक कृच्छ्रके फलनूं प्राप्तहोताहै ॥ १ ॥ सो कहतेहां ॥ प्रत्याम्नायमिति पंदरां १५ गौयां सहित बछयांके दान करे इस बदले कर्के संपूर्ण पापांतें रहित होताहै और परम पदकों प्राप्त होताहै ॥ २ ॥

क्या करके महापापांके समूहांको तैसें उपपातकांको शीघ्रहि नाशकरके शुद्धिको देता है जैसें अग्नि रूईकेसमूहको दाह करताहै ॥ ३ ॥ अब मरीचिजीका वाक्यहै प्रेति पराकव्रतका जो बदलाहै पंदरां १५ गौयां तिनांका ब्राह्मण आदि वर्ण दान करे संपूर्ण पापांकी शुद्धि वास्ते और संपूर्ण कल्याणकी प्राप्तिवास्ते ॥ १ ॥ हेराजन् महापापांकरके युक्तभी जो पुरुष है सो पराकके बदलें करके पापांतें रहित होताहै ॥ २ ॥ और संपूर्ण कृच्छ्र व्रतांके फलको प्राप्त होके परम पद जो विष्णुका लोक तिसनूं प्राप्तहोताहै एह तेरेतांई मैने पराक व्रतकी विधि कहीहै ॥ ३ ॥ पूर्वोक्तहि अर्थको स्पष्टकरतेहैं पराकेति पराककृच्छ्रव्रतके करणे विषे जो असमर्थ है तिस पुरुषके पाप दूरकरणे वास्ते प्रत्याम्नाय कहाहै ब्राह्मणांके तांई भिन्न २ पंदरां १५ गौयांके देणेकरके शुद्धि को प्राप्तहोताहै एहि अर्थहै ॥ अपरार्कविषे चतुर्विंशति मतविषे कहाहै प्रेति पराककृच्छ्रव्रत और

महापातकजालानिह्युपपातकमेवच तत्सर्वंनाशयित्वाशुतूलराशिमिवानलः ३ मरीचिः प्रत्याम्नायंपराकस्यदशपंचगवांद्विजः दद्यात्पापविशुद्ध्यर्थंसर्वश्रेयोभिवृद्धये १ महापातकयुक्तोपिसर्वपापैःप्रमुच्यते प्रत्याम्नायेनकृच्छ्रस्यपराकस्यजनाधिप २ सर्वकृच्छ्रफलंलब्ध्वाप्रयातिपरमंपदम् इतितेहिसमाख्यातःपाराकोविधिरुत्तमः ३ पराककृच्छ्राचरणासमर्थस्य प्रत्याम्नायंपंचदशगवांविप्रेभ्यःपृथग्दत्त्वाशुद्ध्यतीतिवाक्यार्थः ॥ अपरार्के चतुर्विंशतिमते ॥ पराकतप्तातिकृच्छ्रस्थानेकृच्छ्रत्रयंचरेत् सांतपनस्यवाप्यर्द्धमशक्तौव्रतमाचरेत् १ स्मृत्यर्थसारेतु तप्तकृच्छ्रेषट्पराकेपंचेति। असौप्रत्याम्नायोमहत्तप्तकृच्छ्रे।तप्तकृच्छ्रेतु अपरार्के मार्कंडेयः प्राजापत्यसमाधेनुस्तद्द्वयंहिपराकके। विशेषमाहसएव पराकेतुसुवर्णंस्याद्धेमशृंगीतथैवचेति॥हेमशृंगीग्रहणेन कांस्यदोहाद्युपस्करवतींधेनुं लक्षयति ॥

तप्तकृच्छ्र और अतिकृच्छ्र इनांविषे एक एक व्रतका त्रयत्रय प्राजापत्य व्रत बदला कहाहै जेकर इनांतीनां विषे भी असमर्थहोवे तां सांतपन व्रतका जो आदकाअर्द्धहै तिसको करे ॥ १ जो स्मृत्यर्थसारविषे फेर कहाहै कि तप्तकृच्छ्र व्रतविषे छे६ प्राजापत्यव्रतबदलाकरे और पराकव्रतविषे पंच५ प्राजापत्यबदला करे सो एहप्रत्याम्नायमहातप्तकृच्छ्र विषे जानणा ॥ तप्तकृच्छ्रविषे अपरार्कविषे मार्कंडेयजीका वचनहै प्राजापत्यके तुल्य फलदेणवाली प्रसूता गौ १ कहीहै सो धेनु पराक व्रत विषे दोकहीयांहैं ॥ इस विषे मार्कंडेयहि विशेष कहताहै पराकव्रत विषे सुवर्ण दानकरे तैसे सुवर्णके शृंग और रूप्पेके खुर और कांस्यपात्रतें आदलेके समग्रीकरके युक्त धेनु का दान करे ॥

इसतें अनंतर मासोपवास कृच्छ्रकों जावाल ऋषि कहताहै अनेति एकमासपर्यंत उपवास व्रत महापापांके नाशकरणेवाला कहाहै ॥ अब इसकाप्रत्याम्नायकहतेहां बारां १२ दिनके उपवासकर्के युक्त पराक व्रतहै अथवा दिन दिन प्रति सठ ६० ब्राह्मणकहणे तिसकारणतें मासकेउपवास व्रत विषे भी फलकी प्राप्तिवास्ते बदला सठ ६० ब्राह्मणहि कहने एह बस ऐश्वर्य युक्तपुरुष विषे जानणा ॥ और निर्धनपुरुष तीस ३० ब्रह्मणांके तांई भोजन देवे दिनविषें ॥ इसतें उपरंत यावककृच्छ्र व्रतकहाहै तिसविषें शंखजीकावाक्यहै गवित्ति गौकेंगोयेतें यवांकों युगके एक मासपर्यं जो भक्षणहै सो संपूर्णपापांके दूरकरणेवास्ते यावककृच्छ्र किहाहै १ देवलजीका वाक्यहै

अथ मासोपवासकृच्छ्रम् ॥ जावालः । अनशनंमासमेकंतुमहापातकनाशन मिति अस्यप्रत्याम्नायोद्वादशाहोपवासरूपपराकः षष्टिमितब्राह्मणभोजनं प्रतिदिनंवाविहितम् ॥ तथात्रापि षष्टि ६० मिताब्राह्मणामासंयावत् प्रतिदिनंमासोपवासफलकामनयाभोज्याः इदंचधान्यसमृद्धिपरमितरस्यार्द्धादि व्यवस्थयायोज्यम् ॥ अथयावककृच्छ्रम् तत्रशंखः । गोपुरीषाद्यवानश्नन्मासमेकंसमाहितःव्रतंतुयावकंकुर्य्यात्सर्वपापापनुत्तये १ देवलः । अथातः संप्रवक्ष्यामिकृच्छ्रंयावकसंज्ञकम् यस्याचरणमात्रेणमुच्यतेब्रह्महत्यया १ ॥ शृणुध्वंमुनयःसर्वेयावकंकृच्छ्रमीरितम् विषदानेचयत्पापंयत्पापंगृहदाहके २ शस्त्रधारेणयत्पापंयत्पापंविप्रनाशनात् विधवाव्रतलोपेचयतिसंन्यासिनोरपि ३ गृहस्थस्यसदाचारत्यागेयत्पापमुच्यते प्रकृतेनापियत्पापंतेषां विस्मयतस्तथा ॥ ४ ॥

अर्थेनि यावकनामकर्के जो कृच्छ्रव्रतहै तिसनूं कहतेहां । जिसके करणेकर्के पुरुष ब्रह्महत्यापापतें रहितहोनाहै ॥ १ ॥ अवमरीचिका वचनहै श्रिति हेसंपूर्णमुनीश्वरो श्रवणकरो मैंनें यावककृच्छ्र नामव्रतकहीदाहै विषकेदेणेकर्के जोपापहै और गृहविषें अग्निलाणेकर्के जोपापहै ॥ २ ॥ और शस्त्रके धारणेनें जो पापहै और ब्राह्मणके मारणेंतें जो पापहै और विधवा स्त्री विषे गमन करणेका जो पापहै और ब्रह्मचारीके और संन्यासीके व्रतके दूरकरणेविषें जोपापहै ॥ ३ ॥ और गृहस्थीकों कर्मांके त्यागविषें जो पापहै और स्वभावकर्के जो पापहै और तिनां विधवा स्त्री आदिकांकों भय देणेका जो पापहै ॥ ४ ॥

और अपणेमानवास्ते ब्राह्मणतांईं दानदेकर जो कहणाहै मैंनेंदानकीया तिसकहणेतें ओर ब्राह्मण के अवमानतें जोपाप और ब्राह्मणकी निंदाकरणे विषे और माताका निरादरकरणेतें जो पाप ॥ ५ ॥ और धेनुकी निंदाविषे औरशिवांकी निंदाविषें और विष्णुकी निंदाविषे और यज्ञांकी निंदाविषे जो पाप ॥ ६ ॥ और विना बुलाय परगृहभोजनविषे और अनध्याय दिनांविषें पढ नेका जो पाप है और दुष्टपुरुषके साथ संगविकरणेतें जो पाप है और धनके मदतें जो पाप है ७ ॥ और दुग्धकर्के स्नानकरणेतें जो पापहै और स्त्रीके निरपराध त्यागणें कर्के जो पापहै यज्ञके त्यागविषे और भांडयांके वेचणेविषे जो पापहै ॥ ८ ॥ और विधवानें जो केशातें रहितस्नानक

दानस्यकीर्त्तनात्पापंयथाविप्रावमानतः यत्पापंविप्रानिंदायांयत्पापंमातृभ र्त्सनात् ॥ ५ ॥ यत्पापंधेनुनिंदायांयत्पापंशिवभर्त्सने यत्पापंविष्णुनिंदा यांयत्पापंक्रतुकुत्सने॥६ ॥ अमानभोजनेपापमनध्यायेपुपाठने दुःसंगते श्चयत्पापंयत्पापंधनगर्वतः ॥ ७ ॥ यत्पापंपयसास्नानेयत्पापंदारमोचने यत्पापंक्रतुसंत्यागेयत्पापंभांडविक्रये ॥ ८ ॥ सकेशस्नानरहिता विधवा कांस्यभोजना पुनर्भुक्तासताम्बूलासदानिन्दापरायणा ॥ ९॥ सदाभ्रमति यःनारीपतिद्वेषपरायणा पुत्रःपितॄणांविद्वेषीसदाविप्रापराधकृत् ॥ १० ॥ कुचैलः सर्वदातिष्ठन्यथातत्क्षालनादिसः वहुत्राशीनिष्ठुरंवक्ताविप्रदाने षुविघ्नकृत् ॥ ११ ॥

रणाहै और तिसकों जो कांस्यपात्रविषे भोजन करणेका पापहै और विधवाकों दूसरी वार भो जन करणे विषे और तांबूलके भक्षण करणे विषे जो पापहै और जो स्त्री सदानिंदाविषे युक्तहै तिसकों जो पापहै॥९॥और जो सदाघरघरविषे भ्रमतीहै और पतिविषे द्वेषकर्के युक्तहै तिसकों जो पाप और पुत्रकों पिताके साथविरोध करणेका जो पापहै और ब्राह्मणविषे अपराधकरणे काजोपापहै ॥ १० ॥ और सर्वदामलिन वस्त्रधारणका जो पाप और हस्छोतरहृवस्त्रके अप्रक्षाल णेका जो पाप और वहुत जगा भोजन खाणेविषे जो पाप और जो कठोरवचनकों कहताहै तिसका जो पाप और ब्राह्मणांके तांईं दान देणे विषे विघ्न करणे वालेकों जो पापहै ११ ॥

इनां संपूर्णपापांके दूरकरणे वास्ते यावक कृच्छ्रव्रतकों करे ॥ पराशरजीका वचनहै सर्वेति संपूर्ण पापांके दूर करणे वास्ते यावक कृच्छ्र व्रतकहाहै जिसके करणे करके ब्राह्मण शुद्धिकों प्राप्त होताहै ॥ १ ॥ इसकी विधि कहतेहैं अव्रेति जिनांके भक्षण करणेतें व्रत न दूर होवे असयां यवांकों अर्थात् गोमयतें निकालके यवांकों आप ग्रहण करताहोई जो अग्नि तिस विषे छे गुणा अधिक जल करके पकाके व्रती जो पुरुषहै शुद्धिकों स्नान पूर्वक करे तिस पके होये यवागूकों पलाशपत्रांके दूने विषे रखकर ॥ २ ॥ और यव न होण तां व्रीहि ग्रहण करे वा श्यामाक क्या सवांक ग्रहणकरे इसके मानतें दिन दिनविषे प्रथम ब्राह्मणके ताईं देकर विष्णुनांईं सो अन्नअर्पण करे ॥ ३ ॥ और नित्यकर्मकों करकेसूर्यके अस्त

एतेषांपावनार्थायवावकंकृच्छ्रमाचरेत् ॥ पराशरः ॥ सर्वपापविशुद्ध्यर्थं यावकंकृच्छ्रमीरितम् तदाचरणमात्रेण विप्रोभवतिशुद्धिमान् ॥ १ ॥ अव्रतघ्नयवान्पक्कास्वगृह्याग्नौव्रतीशुचिः तद्यवागूंसमाधायब्रह्मपत्रपुटं वशी ॥ २ ॥ यवाभावेव्रीहयोवाश्यामाकाह्यस्यमानतः ॥ तदन्नंप्रत्यहं दत्त्वायवागूंविष्णवेऽर्पयेत् ॥ नित्यकर्मादिकंकृत्वायावदस्तंदायते रविः ॥ ३ ॥ तावत्पर्यंतंपूर्वंविभूतिं विश्वरूपादिकं पठन्। स्थित्वा नारायणमनुस्मरन् यवागूं पिबेत् ॥ तदाहगौतमः ॥ ब्रह्मपत्रपुटेराजन्धृत्वासायमतंद्रितः तावतामनसाविष्णुंस्मरन्नंदायतेरविः। १। यवागूं विष्णवेदत्त्वापश्चात्पीत्वास्वयंमुदा पूर्ववत्क्षालनंकृत्वापादपाण्योर्यथाक्रमम् ॥ २ द्विराचम्यशुचिर्भूत्वास्वपेन्नारायणाग्रतः अजस्रंधारयेदग्निंयावत्कृच्छ्रंसमाप्यते ॥ ३ ॥ परेद्युरेवंकुर्वीतद्वादशाहोभिरीरितम् तदंतेगौःप्रदातव्यापंचगव्यंपिबेत्तदा ४ ॥ एवंकृत्वाद्विजोयस्तुसद्यः पापात्प्रमुच्यते

पर्यंत विभूति विश्वरूपादिका पाठकरे और नारायणका स्मरणकरपीछे तिसयवागूका पानकरे ॥ तिसी नूं गौतम ऋषि कहताहै हेराजन् आलसतें रहित होके सायं काल विषे भक्षण करणे योग्य जो यवागू तिसकों पलाशपत्रांके दूनेविषे रखके मनकरके विष्णुकास्मरणकरे सूर्यके अस्ततक १ ॥ फेर विष्णुनांईदेके आप पानकरे हर्षकरके पीछेपूर्वकी न्यांईहस्थ और पैरोंकोंक्रमसें शुद्धकरके २ ॥ दो वार आचमन करे और नारायणके आगे शयन करे और निरंतर अग्निका धारण करे जितनापर्यंत कृच्छ्रव्रत नहि समाप्त होवे ॥ ३ ॥ तितना कालकरताहै ऐसे संपूर्ण विधि दूसरे दिनसें लेके बारांदिवतककरके अंतविषे पंचगव्यकों पीवे और गौ दानकरे ऐसे करणे तें तात्काल द्विजपापतें रहितहोताहै ॥ ४ ॥

इसतें उपरंत यावक कृच्छ्रका वदलाहै तिसविषे देवलजीका वाक्यहै कृच्छ्रस्यति इसयावककृच्छ्रके प्रत्याम्नायनूं श्रवणकर जिसके एकवार करणेकर्के ब्राह्मणादि तात्कालंहिपापतें रहितहोंताहै । १ । योगीश्वरका वाक्यहै प्रेति यावककृच्छ्रके वदलेनूं कहतेहां जो वदला संपूर्णपापांके नाश करणे वाला श्रौर पुरुषांकों संपूर्ण कृच्छ्र फलकेदेणे वालाहै ॥ १ ॥ यावक कृच्छ्रकावदलेमें दश १० गौंयांसहित वछयांके दुग्धदेणे वालीयां श्रौर इछे स्वभाववालीयां वस्त्रभूषणांकर्के संयुक्त ॥ २ ॥ भिन्न भिन्न ब्राह्मणांके तांइं देणे योग्यहैं जो ब्राह्मण जीविकासें रहितहैं ॥ पीछे देहकी शुद्धि वास्ते पंचगव्यकों पीवे एह वदला यावक कृच्छ्रके फलदेणे वाला सेवणे योग्यहै

श्रथयावककृच्छ्रप्रत्याम्नायः॥ तत्रदेवलः ॥ कृच्छ्रस्ययावकस्यास्यप्रत्याम्नायमिमंशृणु सकृत्कृत्वाद्विजोयस्तुसद्यः पापात्प्रमुच्यते १ योगीश्वरः प्रत्याम्नायंप्रवक्ष्यामियावकस्यमहात्मनः सर्वपापप्रशमनं सर्वकृच्छ्रफलंनृणाम् १ ॥ गावोदशप्रदातव्याः प्रत्याम्नायेप्रकल्पिताः सवत्सादुग्धसंयुक्ताः सुशीलास्समलंकृताः २ विप्रेभ्यःप्रतिदातव्या श्रवृत्तिभ्यःपृथक्पृथक् पंचगव्यंततःपश्चात्पिवेद्देहविशुद्धये ३ एतत्कृच्छ्रस्यफलदंयावकस्यसुखाप्तये ॥ गौतमः ॥ यावकस्यमहापापहारिणःफलदायकम् सर्वपापोपशमनंमहत्पुण्यप्रदायकम् ॥ १ ॥ सम्पूर्णवस्त्राभरणखुरशृंगोपशोभिताः सवत्सायुवतीःसाध्वीर्गवांसंख्यादशस्मृताः ॥ २ ॥ पयस्विनीर्द्विजाग्र्येभ्यः प्रदातव्याःफलाप्तये पंचगव्यंपिवेत्पश्चाच्छुद्धोभवतिमानवः ॥ ३ ॥

सुखकी प्राप्तिवास्ते ॥ १ ॥ गौतमजी कावाक्य है येति यावककृच्छ्र जो व्रतमहापापांके नाश करणे वाला तिसका वदला फलके देणे वाला श्रौर संपूर्ण पापांके नाश करणे वाला श्रौर महत्पुण्यकेदेणे वालाहै ॥ १ ॥ तिसमें संपूर्ण वस्त्र श्रौर भूषण श्रौर रुप्येके खुर श्रौर सुवर्णके शृंगतिनां कर्के शोभायमान सहित वछयांके श्रौर जुवाण सुशीला दश गौयां १० देणे वास्ते कथनकीतयांहै ॥ २ ॥ दुग्धदेणेवालीयां फलकी प्राप्ति वास्ते श्रेष्ट ब्राह्मणांकेतांइं देवे श्रौर पीछे पंचगव्यका पानकरे तां मनुष्य शुद्धिकों प्राप्त होताहै ॥ ३ ॥

जो पुरुष इस प्रकार करताहै सोयावकव्रतके फलकों प्राप्त होके शुद्धहोताहै ॥ ४ ॥ अवसौम्यकृच्छ्र कहतेहैं तिसविषे याज्ञवल्क्यकावचनहै पिण्येति प्रथम दिनाविषे तिलांकों कुटकरभक्षण करे और दूसरे दिन चावलांकी पिछका पान करे और तीसरे दिन तक्र क्या छाहका पानकरे और चौथे दिन केवलजलका पानकरे और पांचमे ५ दिन यवांकेसतुयांकापानकरे और एक रात्रका उपवास करे एह छे दिनका सौम्यकृच्छ्रव्रत कहाहै । १ । इहां द्रव्यका परिमाण प्राणांके निर्वाह मात्रजानणा ॥ जावालऋषिनें तो चार दिनांका सौम्यकृच्छ्र कहाहै एक दिन विषे तिलांकों कुटकर भक्षण करे और दूसरे दिन सक्तु पान करे और तीसरे दिन छाहका पानकरे

एवंकृतेनरोयस्तुयावकस्यस्वरूपिणीम् गवांसंख्यांद्विजाग्र्यायदत्त्वाफलमवाप्नुयात् ॥ ४ ॥ अथसौम्यकृच्छ्रम् ॥ तत्रयाज्ञवल्क्यः ॥ पिण्याकाचामतक्राम्बुसक्तूनांप्रतिवासरम् एकरात्रोपवासश्चकृच्छ्रःसौम्योयमुच्यते १ ॥ द्रव्यपरिमाणंतुप्राणयात्रामात्रनिबन्धनमधिगंतव्यम् ॥ जावालेनतुचतुरहव्यापीसौम्यकृच्छ्रउक्तः । पिण्याकंसक्तवस्तक्रंचतुर्थेहन्यभोजनम् वासोवैदक्षिणांदद्यात्सौम्योयंकृच्छ्रउच्यते ॥ १ ॥ प्रायश्चित्तेन्दुशेखरे ॥ वारुणकृच्छ्रउक्तः ॥ मासंपरिमितसक्तूदकपाने वारुणकृच्छ्रः ॥ श्रीकृच्छ्रस्तु ॥ त्र्यहंपिवेत्तुगोमूत्रंत्र्यहंवैगोमयंपिबेत् त्र्यहंयावकमेषश्रीकृच्छ्रःपरमपावनः ॥ १ ॥ अथ यावकृच्छ्रः ॥ यवानांपयःसाधितानां सप्तरात्रं पक्षंमासंवा प्राशने यावकृच्छ्रः ॥

और चौथे दिन विषे उपवासकरे और वस्त्र दक्षिणा देवे एह सौम्यकृच्छ्र कहाहै ॥ १ ॥ प्रायश्चित्तेंदुशेखरविषे वारुण कृच्छ्रव्रत कहाहि एकमासपर्यंत जलकर्के युक्त जो सत्तु तिनांके पान करणेविषे वारुण कृच्छ्रव्रतहोताहै । अब श्रीकृच्छ्रकहीदाहै त्र्यहमिति त्रय दिन गोमूत्रपीवे और त्रय दिन गौका गोयापानकरे और त्रय दिन जवांका काडा पीवे एह श्रीकृच्छ्रव्रत कहाहै ॥ १ ॥ अबयावकृच्छ्र कहीदाहै जलकर्के सिद्धकीते जो यव तिनांका सत दिन पानकरे वा पंदरांदिन वा एक मास भक्षण करण विषे यावकृच्छ्र कहाहै ॥ एह पूर्वोक्त यावक कृच्छ्रतें विलक्षण होणे कर्के उसते भिन्नहै

अब जलकृच्छ्रहै ॥ भोजनकों त्यागके जल विषे स्थितहोवे दिन रात्रा तां जलकृच्छ्र होताहै ॥ अब वज्रकृच्छ्र है ॥ गोमूत्र कर्के युक्त जो यव तिनांकों एक दिन भक्षण करे तां वज्रकृच्छ्र होताहै इसजगाभी कालकानियम अहोरात्रहि जानणा और पापपुरुषको वज्रकी न्याईहै इस कर्के वज्रकृच्छ्रनामहै ❀ अब तुला पुरुष नाम कर्के कृच्छ्रकहीदाहै तिस विषे याज्ञवल्क्यजी का वचन है एषामिति तिल कुटे होये और चावलांकी पिछ और छाह और जल और सत्तुयांकों क्रमकर्के एक एककों त्रय त्रय दिन भक्षण करे तां पंदरां १५दिनांकर्के तुलापुरुषनाम कृच्छ्रव्रत होताहै ॥ १ ॥ इसतुलापुरुषका पंदरा दिनांकर्के विधान होणेतें उपवास नहि कहा ॥ यमजीनें इकीयां दिनांका तुलापुरुष व्रत कहाहै अचाममिति चावलांकी पिछ और तिलकुटेहोये

अनाशनो जलस्थो होरात्रं क्षिपेदिति जलकृच्छ्रः ॥ वज्रकृच्छ्रस्तु गोमूत्रयावकपानेएकोवज्राख्यः कृच्छ्रः ❀ अथतुलापुरुषाख्यकृच्छ्रः ॥ तत्रयाज्ञवल्क्यः ॥ एषांत्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् तुलापुरुषइत्येषज्ञेयः पंचदशाहकः १ ॥ एषांपिण्याकाचामतक्राम्बुसक्तूनामित्यर्थः ॥ १ ॥ अत्रपंचदशाहकत्वविधानादुपवासस्यनिवृत्तिः । यमेनत्वेकविंशतिरात्रिकस्तुलापुरुषउक्तः ॥ आचाममथपिण्याकंतक्रंचोदकसक्तुकान् त्र्यहंत्र्यहंप्रयुंजानोवायुभक्ष्यस्त्र्यहंद्वयम् एकविंशतिरात्रस्तुतुलापुरुषउच्यते ॥ १ ॥ ❀ अथकायकृच्छ्रम् ॥ तत्रदेवलः ॥ प्राजापत्यंतप्तकृच्छ्रंपराकंयावकंतथा ततःसांतपनंकृच्छ्रं महासांतपनंतथा ॥ १ ॥ कायकृच्छ्रंतथाप्रोक्तमतिकृच्छ्रंविशुद्धिदम् ॥ औदुम्बरंचपर्णंचफलकृच्छ्रमतःपरम् ॥ २ ॥

और छाह और जल और सतु इनांकों क्रम कर्के त्रय त्रय दिन भक्षण करे और छे ६ दिन वायु भक्षण करे ऐसे इकीस २१ दिनांका तुलापुरुष कहा है इसका नामभी तुलापुरुषदानके तुल्यफल देणे कर्के है तिसके तुल्यहै ॥ १ ॥ ❀ इसतें उपरंत कायकृच्छ्रहै तिस विषे देवल जीका वाक्यहै प्रेति प्राजापत्यकृच्छ्र १ और तप्त कृच्छ्र २ पराककृच्छ्र ३ यावककृच्छ्र ४ सांतपनकृच्छ्र ५ महासांतपन ६ कायकृच्छ्र ७ अतिकृच्छ्र विशेष कर्के शुद्धिके देणे वालाहै और ८ औदुम्बरकृच्छ्र ९ पर्णकृच्छ्र १० और इसके अगे फलकृच्छ्र ॥ ११ ॥ २

माहेश्वरकृच्छ्र १२ ब्रह्मकृच्छ्र १३ धान्यकृच्छ्र १४ स्वर्णमयकृच्छ्र १५ पिच्छे कृच्छ्र ब्रत तेरां १३ कथन कीतेहैं अब लिंगपुराण विषे कथन कीते जो अतिकृच्छ्र और काय कृच्छ्र मिला करके पंदरां कृच्छ्र होतेहैं संपूर्णलोकांके उपकारवास्ते लिखेहैं ॥ कायकृच्छ्र और अतिकृच्छ्रका लक्षण जो लिंगपुराण विषे कहाहै तिसनूं कहतेहां कायेति कायकृच्छ्रनूं कहतेहां जो महापापांकों शुद्धकरणे वास्ते और उपपातकांकी शुद्धिकरणे वास्ते मुनियानें कथन कीताहै १ ॥अब जो पाप कायकृच्छ्र करकें दूर होतेहैं तिनको लिखतेहैं भविष्यत्पुराण विषे ॥ कायकृच्छ्रकरकें दूरहोणवाले पाप कहेहैं तुलेति एक हजारका जो दान कर्ताहै और हजार

एवंमाहेश्वरंचैवब्रह्मकृच्छ्रंतथैवच धान्यंस्वर्णमयंचैवदशपंचैवकीर्त्तितम् ३
पूर्वंत्रयोदशकृच्छ्राणीत्युक्तम् ।इदानींलिंगपुराणोक्तत्वादतिकृच्छ्रकायकृच्छ्राभ्यांसहपंचदशभवंतिसर्वेषामुपकारकत्वाल्लिखितम् ॥ कायकृच्छ्रातिकृच्छ्रलक्षणंलिंगपुराणोक्तंविशिनष्टि ॥ कायकृच्छ्रंप्रवक्ष्यामिमहापातकशुद्धये उपपातकशुद्ध्यर्थंमुनिभिःपरिकीर्त्तितम् ॥ १ ॥ भविष्यत्पुराणे ॥ तुलाधेनुसहस्राणिअष्टाब्दानिद्विजोत्तम दाताप्रतिग्रहीताचअन्योन्यंनावलोकयेत् ॥ १ । तुलाधेनुसहस्रदानानंतरमष्टवर्षपर्य्यन्तं दातृप्रतिग्रहीत्रोरवलोकनादिनिषिद्धमित्यर्थः ॥ यदिदैवाद्यत्प्राप्तंतीर्थेषुचमहोत्सवे तदातद्दोषशांत्यर्थंकायकृच्छ्रंसमाचरेत् ॥ २ ॥ द्वितीयोजपकृत्सूत्तःसहस्रंविधिपूर्वकम् द्वितीयःप्रतिग्रहीता उभयोर्दानयोराजातथाब्रह्मसदस्ययोः ॥ ३ ॥
चत्वार्य्येववहिवर्षाणितन्मुखंनावलोकयेत् ।

धेनुका जो दान कर्ताहै और तिनांदानांकों जो ग्रहण कर्ताहै इसमे दाता और प्रति ग्रहीताकों अठ वर्ष ८ पर्यंत आपसमें देखणका निषेध है क्या आपस विषे दर्शन न करें ॥ १ ॥ जेकर तीर्थां विषे फेर महोत्सव विषे दैवकरकें इनां दूवोंकाका मिलाप होवे तां तिसदोषकी शांतिवास्ते काय कृच्छ्र व्रतकों करे दाताकों एह प्रायश्चित्तहै ॥ २ ॥ और दानके ग्रहण करणे वाला विधि पूर्वक एक हजार १००० गायत्रीके जप करकें शुद्ध होवाहै तुलादान हजार और धेनुदान हजार इन दोनों दानों विषे राजा ब्रह्मा और सदस्यके मुखकों चारवर्ष पर्यंत न देखे ॥ ३ ॥

ब्रह्म और सदस्यका अर्थ शब्द कल्प द्रुम विषे कहाहै एकइति एक कर्मविषे नियुक्त होताहै और दूसरा कर्मका धारक होताहै और तीसरा अर्पणको कर्त्ताहै और चौथापुरुष कर्मको कर्त्ताहै ॥ १ ॥ जोकर्मविषे निरंतर युक्तहै तिसका नाम आचार्य और सोहि पुरुष ब्रह्मांग जो होम कर्महै तिस विषे युक्त होवे सो ब्रह्मा कहीदाहै और सोहि ब्रह्माआप हवन करे तिसका नाम होताहै और जो (विधिके दखाणे वालाहै तिसका नाम सदस्य कहाहै इसअमरकोशके वाक्यतें) कदाचित् राजा ब्रह्मसदस्यके मुखको देखे तां तिसको पापदूरकरणवास्ते कायकृच्छ्रव्रतहै ब्रह्मा और सदस्य को एक हजार१०००गायत्रीका जप शुद्धिवास्ते कहाहै ॥ ऐसे न करे तां दोषनूं बृहस्पति जी

ब्रह्मसदस्ययोःसंज्ञा शब्दकल्पद्रुमे एकःकर्मनियुक्तःस्याद् द्वितीयस्तत्र धारकः तृतीयःप्रणएकंकुर्य्यात्ततःकर्मसमाचरेत् १ कर्मनियुक्तआचार्यः सच ब्रह्मांगके होमकर्मणिब्रह्मा स्वयंहोमकरोहोतापीत्यादि सदस्याविधि दर्शिनइत्यमरात्सदस्योविधिदर्शीवोध्यस्तत्परिहाराय दातुः कायकृच्छ्रमि तरयोर्ब्रह्मसदस्ययोश्चसहस्त्रगायत्रीजपः। अन्यथादोषमाहबृहस्पतिः। दातुःप्रतिग्रहीतुश्चकायकृच्छ्रोजपोमहान् अन्योन्यालोकनेनोचेत्तद्दानंनि ष्फलंभवेत् १ महान्सचसहस्त्रावच्छिन्नोनोचेत् तन्निष्क्रियमकृत्वाचेदित्य र्थः॥ सर्वमहादानप्रतिग्रहेषुदातृप्रतिग्रहीत्रोःब्रह्मसदस्ययोश्चैवमुक्तं प्राय श्चित्तंसर्वत्र वेदितव्यम् लांगलेपंचसंज्ञेचविश्वचक्रेमहत्तरे सप्ताब्दंचत थाराजातन्मुखंनावलोकयेत् ॥ २ ॥

कहतेहैं॥ दातुरिति दाता और प्रतिग्रहीता आपसविषे देखण तो दाता कायकृच्छ्रव्रत न करे और प्रतिग्रहीतामहान् क्या एकहजार गायत्रीका जप न करे तां सोदान निष्फल होताहै १ तिसको शुद्धिको जेकर नकरे संपूर्ण महादान प्रतिग्रहों विषे दाता और प्रतिग्रहीताको और ब्रह्मा और सदस्यको प्रायश्चित्त जैसे कहाहै सो संपूर्ण स्थानांविषे जानणेयोग्यहै ॥ और पंच लांगल दान विषे और विश्वचक्र महा दानविषे राजा तिनांदानांके ग्रहण करण वालयां पुरुषांके मुखनूं सत्त ७ वर्ष न देखे २ ॥

सप्तेति सप्तसागर दानों विषें और चर्मधेनुके प्रतिग्रह विषें और महाभूत घट दान विषें और तु
ला दानविषें कहे जो सप्त प्रतिग्रह तिनां दानां विषें आचार्य और ब्रह्मा क्याहोना और विधि
के दस्खाणे वाला इनांके मुखकों राजा नदेखे कदाचित् देखेता पूर्वकी न्याईं कायकृच्छ्र आ,
दिकों करे तांशुद्धहोंताहे ॥ ३ ॥ और हिरण्य गर्भ दानविषें और ब्रह्मांड दानविषे दाता जेकर
आपसविषें मुखदेखे तां दानके फलको नहि प्राप्तहोता इसजगाभी प्रायश्चित्त आचार्य और
ब्रह्मासदस्यको पूर्वकी न्याईंहे ॥ ४ ॥ और सम्यक् कल्पवृक्षके दानविषे और तैसे कल्पलतादान
विषे राजा छे६वर्षतक ब्राह्मणके मुखको नदेखे और ब्राह्मण राजाकों नदेखे १ कदाचित् आप
सविषे देखें तां कायकृच्छ्र और गायत्रीका जपकरें तिसविषे संख्या क्रमकर्के जानणे योग्यहै

सप्तसागरदानेषुचर्मधेनोःप्रतिग्रहे महाभूतघटेचैवतुलायांनावलोकयेत्
३ ॥ उक्तेषुसप्तप्रतिग्रहेषु तदाचार्य्यब्रह्मसदस्यानां प्राग्वत्कायकृच्छ्रादिकं
वेदितव्यम् ॥ हिरण्यगर्भेब्रह्माण्डेदातायदिहिपूर्ववत् अन्योन्यालो
कनेराजन्नदानफलमश्नुते ॥ ४ ॥ आचार्य्यब्रह्मसदस्यानांपूर्ववत् ॥ सं
कल्पपादपादानेतथाकल्पलताग्रहे ॥ षडब्दंतन्मुखंराजाविप्रोवानावलो
कयेत् ॥ ५ ॥ कायकृच्छ्रंगायत्रीजपंच तत्रसंख्याक्रमेणवेदितव्यम् ॥ हि
रण्यधेनुदानेचहिरण्याश्वप्रतिग्रहे ॥ पूर्ववत्सप्तसंख्याब्दमन्योन्यंनावलो
कयेत् ॥ ६ ॥ कृच्छ्रादिकंपूर्ववत् ॥ हिरण्याश्वरथेचैवहेमहस्तिरथेतथा
धरादानेकालपुरुषेकालचक्रेतथैवच ॥ ७ ॥ तिलधेनौराशिचक्रेपंचाब्दंना
वलोकयेत् यदिदैवात्समालोकोह्यतिकृच्छ्रंचरेद्व्रती ॥ ८ ॥

॥ ५ ॥ अर्थात् राजाकायकृच्छ्रकरे और ब्राह्मणजप करे और सुवर्ण धेनुके दान विषे और
सुवर्णके अश्व दानविषे पूर्वकी न्याईं सत्त ७ वर्षतक आपस विषे न देखें इसमेभी जेकर
देखे तो कृच्छ्रादि व्रतपूर्वकी न्याईं जानणा ॥ ६ ॥ सुवर्णके अश्व कर्के युक्त जो रथ है
तिस विषें और सुवर्णके हस्ति कर्के युक्त जो रथ है तिस दान विषें और पृथ्वी दान विषें
और काल पुरुष दान विषे और कालचक्र दान विषे ॥ ७ ॥ तैसें और तिल धेनु दानविषें
और राशि चक्र दानाविषे दाता और प्रतिग्रहीता आपस विषे पंच वर्ष पर्यंत नदेखें जेकर
देवकर्के आपस विषें देखणतां दाता अतिकृच्छ्रव्रतकों करे ॥ ८ ॥

पुनरिति ब्राह्मणपटगर्भ विधानते फेर संस्कारके करणेतें शुद्धिको प्राप्तहोताहै ऐसे न करे तां दो षकों प्राप्तहोताहै और दाताका दान निष्फलहोताहै ९ और कहतेहैं कोटीति कोटि होमविषे और लक्ष होमविषे और पाप पुरुषके प्रतिग्रहविषे दाता आचार्यके मुखको न देखें १० जेकर दैवतें दर्शनकरे तिसविषेभी दाताकों अतिकृच्छ्रव्रतकहाहै और इतर क्या आचार्यआदिकांकों फेर संस्कार शुद्धिके निमित्त कहाहै इसमें वाशब्दसें पूर्वोक्त ५ वर्ष तक निषेध जानना ॥ श्वेत अश्व दानकों जो ग्रहण कर्त्ताहै और मृतपुरुषके निमित्त जो शय्या दान तिसको जो ग्रहण कर्त्ताहै और हाथि दानको जो ग्रहण कर्त्ताहै तिसके मुखकों त्रय ३ वर्ष पर्यंत दाता न देखे ॥ ११ ॥ और जेकर दैवतें तीर्थआदिविषे देखे तां दाता अति कृच्छ्र व्रतकरे और ब्राह्मण पटगर्भ विधितें संस्कार करणेते शुद्धिको प्राप्तहोताहै ॥ १२ ॥ और

पुनस्संस्कारभृद्विप्रःपटगर्भविधानतः अन्यथादोषमाप्नोतिदाताविफलम श्नुते ॥ ९ ॥ कोटिहोमेलक्षहोमेपापपुरुषप्रतिग्रहे आचार्य्यस्यमुखंदातादै वाद्वानावलोकयेत् ॥ १० ॥ तत्राप्यतिकृच्छ्रंदातुरितरेषांपुनःसंस्कारः श्वेताश्वमृतशय्यायांगजदानप्रतिग्रहे त्र्यब्दंहितन्मुखंदातादैवाद्वानावलो कयेत् ॥ ११ ॥ अतिकृच्छ्रंचदातास्याद्ब्राह्मणःपटगर्भतः १२ आर्द्र कृष्णाजिनेचैवसप्तशैलप्रतिग्रहे द्वित्र्यब्दंतन्मुखंदातापूर्ववन्नावलोकयेत् ॥ १३ ॥ ब्रह्मकृच्छ्रंचरेद्दाताइतरेपटगर्भतः शुध्यंतिसततंविप्राःशातातपवचो यथा ॥ १४ ॥ ब्रह्मकृच्छ्रंप्राजापत्यमित्यर्थः ॥ कपिलाद्विमुखीदानेदा सीगृहपरिग्रहे अब्दमेकंद्विजदातापूर्ववन्नावलोकयेत् ॥ १५ द्विमुखीउभ यमुखीत्यर्थः ॥ पर्णकृच्छ्रंततःप्रोक्तमितरेषांहिपूर्ववत् तुलादिसप्तदानेषु ऋत्विजोहोतृकानपि द्वारस्थान्नावलोकेद्वाफलकृच्छ्रमुदाहृतम् १६ मासत्रयमित्यर्थः

कृष्ण मृगके आर्द्र क्या गिल्लेचर्मके दानविषे दोवर्ष और सप्त७पर्वत दानके ग्रहणविषे त्रयवर्ष पर्यंत दाता दानके ग्रहण करणवालेके मुखकों न देखे १३ जेकर दैवतें देखे तां दाता प्राजापत्यकृच्छ्र व्रतकों करे और इतर जो आचार्य्यआदि सो पटगर्भ विधिते शुद्धहोतेहैं एह शातातपका वचनसत्यहै १४ और कपिलागोके दानविषे और उभयमुखी गोके दानविषे और दासी और गृहदानविषे दाता एकवर्षपर्यंत दानग्रहीताके मुखको पूर्वकीन्यांई नदेखे १५ जेकर दैवतें देखे तां दाता पर्णकृच्छ्र व्रतकों करे और आचार्य्य आदिकांकी शुद्धि पूर्वकी न्यांई पटगर्भ विधानतें होतीहै और तुला आदिसप्त७दानां विषे दाता द्वारविषे स्थित जो ऋचांका पठनवाले तिनांकों न देखे त्रयमास ३ पर्यंत जेकर देखे तां फल कृच्छ्र करके शुद्ध होताहै ॥ १६ ॥

सर्वेषामिति संपूर्ण ऋत्विजजोहैं तिनांकेदर्शनविषे दाता आदरकर्के गायत्रीका एक हजारज पकरे और आज्य और भूषण और धेनुइनांके दानविषे और वळद आदिके दानविषे १७ ॥ और महिषी और बकरी और भेड इनांके दान विषे एकमासपर्यंत निरंतरदर्शन न करे जेकर करे तां ऋत्विजांको एकशत१००गायत्रीकाजपकहाहै और जोदानकरणे वालाहै सो तिसदोष केदूर करणे वास्ते धेनुदान करे १८अब इसमे विशेषकहतेहैं सात्विकेति सात्विक क्या चवी यां२४ अवतारांकीयांमूर्त्तियांके दान ग्रहण करणेवाला जो पुरुष है तिसके दर्शनकरणेमे दोष नहिजानणा ॥ अब इसीविषे गालवजीकावचनहै हेब्राह्मणांके प्यारे चवीयां अवतारांकीयांमूर्त्ती आदिकके दानविषे और दशां १०अवतारांके मूर्त्तिदानविषे और हेप्रभो लक्ष्मीनारायण प्रतिमा आदि दानविषे दाता और दानके ग्रहण करणवालेकों परस्परमुखके देखणेविषे दोषनहि १ ॥ और अर्द्धनारीश्वर शब्दका अर्थ कहतेहैं क्या पार्वती शिवांकी प्रतिमादिकके दान विषे और

सर्वेषामृत्विजांप्रोक्तंसहस्रजपमादरात् आज्यालंकारधेनूनामनड्वाहादिसंग्रहे ॥ १७ ॥ महिषीछागवस्तानांमासमेकंनिरंतरम् ऋत्विजां शतगायत्रींदाताधेनुंसमाचरेत् ॥ १८ ॥ सात्त्विकदानेषुचतुर्विंशति मूर्त्यादिदानावलोकने न दोषः ॥ गालवः चतुर्विंशतिमूर्त्यादिदानेषुद्विजवल्लभ दशावतारदानेषु अर्द्धनार्य्यादिषुप्रभो मुखावलोकनंदातृग्रहीत्रो र्नतुदोषभाक् ॥ १ ॥ अर्द्धनारीश्वरं लक्ष्मीनारायणप्रतिमा ॥ उमामहेश्वरप्रतिमादानेषु कृष्णाजिनतिलविरहितेषु दातृप्रतिग्रहीत्रोर्मुखावलोकनं न दोषहेतुः ॥

कृष्ण हारिणका चर्म और तिल इनांते रहित जो दानहैं तिनांविषे दाता और ग्रहीताकों परस्पर देखणेमे पूर्वोक्तदोष नहि ॥ जेडीयां २४ मूर्त्तियां दानवास्ते वनाईंजांदीयांहैं सो पांचतांत्रविषे लिखतेहैं सशक्तिकाय केशवायनमः १ नारायणायनमः २ माधवायनमः ३ गोविंदायनमः ४ विष्णवेनमः ५ मधुसूदनायनमः ६ त्रिविक्रमायनमः ७ वामनायनमः ८ श्रीधराय नमः ९ हृषीकेशायनमः १० पद्मनाभायनमः ११ दामोदरायनमः१२इत्यादिमंत्रोंकर्के जो वारां मूर्त्ति हैं सो शक्तिके साथ गिणनेतें २४ जाणनीयां और दशावतारोंके दानमे मत्स्य १ कूर्म्म २ वराह ३ नरसिंह ४ वामन ५ रामचंद्र ६ पर्शुराम ७ बलदेव ८ बुद्ध ९ कल्की १० इसनामकीयां स्वर्णादिमयमूर्त्तियां जाणनीयां ॥ और जो पिछे पटगर्भ विधि कहीहै सो वस्त्रका गर्भ वनाके तिसकीयोनिसे निकालना एह संस्कार विशेष गोमुखप्रसवकी न्याई जानणा

कृष्णेतिअौर काले हरिणका चर्म और तिल इनांतें रहित श्रेष्ठ प्रतिमाआदिदानके ग्रहणकरनें विषे विशेष जाबालिऋषिकहताहै दशेति इनांदस्सां १० अवतारांके दानके योगांविषें तिल चर्मादिदानांविषे चाहे पूर्वोक्तमूर्तिभी साथहोवे तांभी तिसजगाभोजनकरणें वाले ब्राह्मणकों दाता छे६महीने तक न देखें ॥ १ ॥ उत्क्रांतिरिति मरणसमयविषे आतुरदानकों और वैतरिणी दान कों और पुतलादाह विषे जो ब्राह्मण दानकों ग्रहण कर्त्ताहै और प्रेतके निमित्त जो दान है तिसकों जो ग्रहण कर्त्ताहै और प्राणिके मरणेतें यारमें ११ दिन विषे जो तिसके गृहविषे अन्नकों भक्षण कर्त्ताहै ॥ २ ॥ उग्रशांतियां क्या बालकांके जन्म विषे अभुक्तमूलादि

कृष्णाजिनतिलरहितेप्रधानप्रतिमाप्रतिग्रहे विशेषमाह जावालिः ॥ दश स्वेतेषुयोगेषुभुक्तवत्सुद्विजोत्तमान् तिलाजिनप्रधानेषुषण्मासंनाऽवलोकयेत् १ उत्क्रांतिवैतरण्योश्चतथाप्रतिकृतौनृप अन्नप्रतिग्रहेतातएकाहभोजनेतथा २। उग्रशान्तिषुसर्वत्रतथामाहिषसंग्रहे कर्त्तानालोकयेद्विप्रंकायकृच्छ्रमथाचरेत् ३ ॥ उत्क्रांतिर्मरणोपयोगिसमयः। प्रतिकृतिः पर्णशरदाहसमयः ॥ अन्नप्रतिग्रहः प्रेतान्नग्रहः ॥ एकाहभोजनं एकादशाहभोजनम् ॥ उग्रशान्तयः शिशूनांजनने अभुक्तमूलादयःस्पष्टमन्यत् । * कायकृच्छ्रंलक्षयतिमरीचिः ॥ चत्वार्य्यहानिग्रासाःस्युरेकैकंप्रत्यहंप्रति निराहारस्तथातेषुचतुर्ष्वासायभोजनम् ॥ १ ॥ तदंतेव्रतिभिर्देयागौरेकाचान्द्रभूषणा कायकृच्छ्रमिदंप्रोक्तंमुनिभिस्तत्त्वदर्शिभिः ॥ २ ॥ चतुर्षुदिवसेषु प्रत्यहमेकैकग्रासभोजनम् ततश्चतुर्षूपवासः ततश्चतुर्षुसायंभोजनमिति द्वादशाहनिर्वर्त्योयं कायकृच्छ्र इत्यर्थः ॥

तिनांविषे जो दानकों ग्रहण कर्त्ताहै और तैसे माहिषदानको जो ब्राह्मण ग्रहण कर्त्ताहै तिसकों विधिके करणें वाला न देखे जेकर देखे तां कायकृच्छ्रव्रतकों शुद्धिवास्ते करे ३ * अबकायकृच्छ्र व्रतकों मरीचि ऋषिजीदखातेंहैं चेति चारदिन पर्यंत दिन दिनविषे एक एक ग्रास भक्षणकरे और तिसतें पीछे चार दिन कुछ न भक्षणकरे और तिसतें पीछे चार दिन रात्रि विषे भोजनकरे ऐसे बारां दिनांकर्के कायकृच्छ्रव्रतकों करे ॥ १ ॥ और व्रतकी समाप्तिविषे व्रतिपुरुषांनें रजत भूषण युक्त एक गौ देणेयोग्यहै एह काय कृच्छ्र व्रत यथार्थधर्मके देखणवालयां मुनियांनें कहाहै ॥ २ ॥

अथप्रजापतिका वचनहै चार ४ दिनां विषे चारहि ग्रास दिनविषें भक्षणकरे श्रौर चारदिन कुछ न भक्षण करे श्रौर चार ४ दिन रात्रिविषे भक्षणकरे एह बारांदिनांका परम श्रेष्ठ कायकच्छ्नाम व्रतहोताहै १ विधिवास्ते मरीचिऋषिकावाक्यहै प्रातःकालतेंलेके संध्याकालपर्यंत जैसेविधिहै तैसे ब्राह्मण स्नानकों करे गंधपुष्पश्रादिककें विष्णुका पूजनकरे जद सूर्यअस्तहोवे तांबुद्धिमान् १ विष्णुतांई निवेद्य देकर्के ग्रासका भक्षणकरे श्रौर पीछे हथपादशुद्धकर्के दोश्राचमनकरे श्रौर नारायणकों स्मरणकर्त्ता होया समीपहि शयनकरे फेर दूसरे दिन प्रातःसमय उठके पूर्वकीन्यांई नियमकरे ३ तिस दिनविषेभी ग्रासभक्षणकरे श्रैसे चारदिन ग्रास भक्षण कर्के तिसतें परे चार दिन

प्रजापतिः । चतुर्ष्वहस्सुग्रासाःस्युर्निराहारस्तथापुनः चतुर्ष्वासायभक्ष्यः स्यात्कायकृच्छ्रमिदंपरम् १ तद्विधिमाह मरीचिः। श्रासायंप्रातरारभ्यस्नात्वाविप्रोयथाविधि श्रभ्यर्च्यगन्धपुष्पाद्यैरविरस्तंगतेयदा १ तदाग्रासंसमश्नीयाद्विष्ण्वार्पितममुंसुधीःप्रक्षाल्यपूर्ववत्सर्वंद्विराचम्यशुचिस्तथा २ ॥ स्वपेद्देवसमीपेतुनारायणमनुस्मरन् पुनःप्रातःसमुत्थायकृत्वानियमपूर्वकम् ॥ ३ ॥ तत्रापिभक्षयेद्ग्रासमेवंचतुरहंप्रति ततःपरंनिराहारस्तथा चतुर्ष्वभोजनम् ॥ ४ ॥ श्रभोजनमेकाहारइत्यर्थः॥ गोदानंव्रतपूर्त्यर्थं पंचगव्यंपिबेत्ततः कायकृच्छ्रमिदंदेवाद्विजानांपावनंस्मृतम् ॥ ५ ॥ अथकायकृच्छ्रप्रत्याम्नायः ॥ तत्रदेवलः ॥ शृणुरामप्रवक्ष्यामिकायकृच्छ्रस्यधीमतः प्रत्याम्नायंमहापुण्यंशृण्वतांपापनाशनम् ॥ १ ॥ दशगावःप्रदातव्याः सवत्साभूषिताश्रपि पयस्विन्यःसुशीलाश्चस्वर्णशृंग्योमहत्तराः ॥ २ ॥

उपवासकरे तैसे चार दिनां विषे रात्रिविषे एक श्राहारकरे ४ श्रौर व्रतकेपूर्णफलकी प्राप्तिवास्ते गौदानकरे श्रौर पंचगव्यका पानकरे एहकायकच्छ्र ब्राह्मण श्रादि वर्णांकों पवित्रकरणेवाला कहाहै ५ ॥ अथकायकच्छ्रका प्रत्याम्नायहै तिसविषे देवलजीका वाक्यहै हेराम कायकच्छ्रकें बुद्धि के देणें वाले बदलेंनूं श्रवणकर कैसा बदलाहै महापुण्यहै क्या बहुतपवित्रहै श्रौर जो श्रवण कर्तेहैं तिनांके पापकों दूरकरणे वालाहै १ दश १० गौवां सहित बच्छयांके दुग्धकर्केयुक्त सुशीला स्वर्णके शृंगांकर्के युक्त श्रौर पूजित देणे योग्यहैं बदले विषे ॥ २ ॥

इसी विषयमे गालवजीका वचन है सर्वेति संपूर्ण पापांके दूर करणे वाला जो कायकृच्छ्र व्रत है हेराजन् तिसका प्रत्याम्नाय एह है कि सहित बच्छयांके दश १० गौयां तिनांके दानकरणे करके साधुस्वभाववाला पुरुष कायकृच्छ्र व्रतके फल कों प्राप्त होताहै ॥ १ ॥ अब कण्वऋषिका वचन है कायेति संपूर्ण पापांके नाशकरणे वाला कायकृच्छ्र जो संपूर्ण व्रत है तिसका बदलाराजयांके संपूर्ण पापांके नाश करणे वाला और महा दानके ग्रहणकरणे वाले जो पुरुषहै तिनांके संपूर्ण पापांके नाशकरणे वाला कहाहै अथवा राजयांते प्रति ग्रहउठाणें वालयांके पापको दूर करांहै ॥ १ ॥ स्नात्वेति पुण्यदिन विषे ब्राह्मण पूर्वकी न्याई संकल्पकों करके तिलक और पुष्प आदिकांकर्के दशां ब्राह्मणांकों

॥ गालवः ॥ सर्वपापहरस्यास्यकायकृच्छ्रस्यवैनृप प्रत्याम्नायोदशगवांसवत्साः साधुवृत्तिमान् एतदाचरणेनैवकायकृच्छ्रफलंलभेत् ॥ १ ॥ कण्वः ॥ कायकृच्छ्रस्यसर्वस्यसर्वपापहरस्यच राज्ञांप्रतिग्रहीतॄणां सर्वपापहरंपरम् ॥ १ ॥ स्नात्वापुण्यदिनेविप्रः सुसंकल्प्यैवपूर्ववत् विप्रानभ्यर्च्यगन्धाद्यैर्दशधेनूःपृथक्पृथक् ॥ २ ॥ दद्यात्प्रत्याम्नायभूताः सर्वपापापनुतये एतस्याचरणेपूर्णेकायकृच्छ्रफलंलभेत् ॥ ३ ॥ * अथौदुम्बरकृच्छ्रम् ॥ तत्रदेवलः ॥ औदुम्बरस्यकृच्छ्रस्यलक्षणंवच्मितत्त्वतः कृच्छ्रं महत्तरंभूपसर्वपापहरंपरम् ॥ १ ॥ पितृमातृपरित्यागःस्वदाराणांह्यनागसाम् भगिनीभागिनेयार्थिगर्भिण्यातुरकन्यका ॥ २ ॥ बालश्चकुलवृद्धश्च अतिथिश्चागतःप्रभो सामर्थ्येसतिबन्धूनांत्यागेदोषोमहत्तरः ॥ ३ ॥ ब्रह्महत्यामवाप्नोतियदुपेक्षापरायणः ॥

१० पूजके भिन्न भिन्न एक एककों प्रसूतहोई गौदेवे ऐसें दश१०गौयां दानकरे ॥ २ ॥ एह प्रत्याम्नाय संपूर्णपापांके नाशकरणेवास्ते कहाहै इसके करणेकरके कायकृच्छ्रके फलनूं प्राप्तहोताहै ॥ ३ ॥ * इसतें उपरंत औदुम्बरकृच्छ्रहै तिसविषे देवलजीका वाक्यहै आविति औदुम्बरकृच्छ्रके लक्षणनूं यथार्थकर्के कहतांहां एह कृच्छ्र बहुत श्रेष्ठहै हेराजन् संपूर्ण पापांकेनाशकरणे वालाहै ॥ १ ॥ अब इसकर्के दूरहोणेवाले पापोंका कहतेहां पीति पिता और माता और अपराधतें विना स्त्रीयां इनांका जो त्यागहै और भैण और भनेवां और अर्थी और गार्भिणी और रोगी और कन्या ॥ २ ॥ और बालक और कुलमें वृद्ध और अतिथि इनांसंबंधियांके कदाचित् त्याग विषे सामर्थ्यके होयां २ महा दोषहै ॥ ३ ॥ इनांकों सर्वदा त्यागणे वाला पुरुष ब्रह्महत्या पापकों प्राप्त होताहै ॥

भेति भैण और दूसरीमाताकीकन्या और सर्वपितेरहितजो स्त्रीहै और जिसकाभर्त्ता विदेशगियाहै और अनाथ जो कन्याहै और विधवास्त्री इनांकों जो पुरुषकारणतें विनात्यागताहै । १ । और पिताकी भैण और माताकी भैण और विदेश गियाभर्त्ता जिसका ऐसी पुत्रतें रहित जो स्त्री है और पूजने योग्य जो स्त्री अर्थात् गुरुआदिकोस्त्री तिनांकों त्यागणे करकें पुरुषनरककों प्राप्तहोताहै अथवा(अधनीयां)कयाधनतें रहितजो स्त्रीहै ॥ २ ॥ और महाभारतविषेंभी एहविषयकहाहै पितेति कौमार अवस्थाविषे पितारक्षाकरे और भर्त्ताजुवानी अवस्थाविषेरक्षाकरै और पुत्रवृद्ध अवस्थाविषें रक्षाकरे स्त्री अपने अधीन कदाचित् होणेकों योग्यनहिहै ॥ १ ॥ और उन्मत्त और पतित और नपुंसक और काण और बधिर ऐसें पिताकों पुत्र आदिअन्न वस्त्र आदिकांकरकें रक्षाकरै ॥ २ ॥ अवगोतमजीकावाक्यहै अरक्षेति रक्षणेयोग्यजोस्त्री नाहि तिसकीरक्षाकरताहै और जो रक्षणेयोग्यहै

भगिनींचस्वसारंह्यनाथांगतभर्तृकाम् पुत्रीमनाथांविधवांयस्त्यजेत्कारणं विना ॥ १ ॥ पितृभगिनींमातृभगिनीमपुत्रांगतभर्तृकाम् अर्चनीयांपरित्य ज्यसैवनरकमश्नुते यद्वाअधनीयामियमधनाइत्येवंज्ञाताम् २ महाभारते पितारक्षतिकौमारेभर्तारक्षतियौवने पुत्रस्तुस्थविरेभावेनस्त्रीस्वातंत्र्यमर्ह ति ॥ १ ॥ उन्मत्तपतितक्लीबकाणंबधिरमेवच पुत्रादिर्यत्नतोरक्षेदन्नवस्त्रा दिभिःशनैः ॥ २ ॥ गौतमः ॥ अरक्षणीयांयोरक्षेद्रक्षणीयांपरित्यजेत् सवै नरकमाप्नोतितिर्य्यग्योनिषुजन्यते ॥ १ ॥ किंचवेश्यादासीतन्मातरस्तत्पु त्राःकुण्डगोलकनटविटगायकचार्वाकास्त्वरक्षणीयाः ॥ अनाथगतभर्तृकानि ष्पुत्राःस्त्रियः पितृव्यज्येष्ठभ्रात्रादयोनिष्पुत्रानिर्धनिनः काणकुब्जादयो यत्नतोरक्ष्याः एतेषांपरित्यागेदोषः ॥

तिसकी रक्षा नहि करता सो पुरुषनरककों प्राप्तहोताहै और पशुआदिकजन्मकों प्राप्तहोताहै १ । और विशेषकहतेहै वैश्येति वेश्या और दासी और तिनांकीयांमाता और तिनांकेपुत्र और भर्त्तांके जीवतयांजो जारतें जन्मयाहै ऐसा कुंडपुत्र भर्त्तांके मृतहोयां होयां जो जारतेंजन्मयाहै गोलकपुत्र और नट और विट क्या व्यभिचारी पुरुषका नौकर और गायक और चार्वाक क्या नास्तिक एह रक्षाकरणे योग्यनहिहैं ॥ और विशेषकहतेहैं अनेति संबंधियांते रहित और जिसका भर्त्ता विदेश गियाहै और पुत्रतें रहित जो स्त्री है और पिताका भ्राता और पुत्रतें रहित अथवा वडा भ्राता धनतें रहित भी पूर्वोक्त और काणा अक्षि करकें और कुबतें आदलेके जो पुरुष वा स्त्रीहोवे सो एह यत्नतें रक्षाकरणे योग्यहैं इनांके त्यागविषें दोषहै ॥

तादेति तिस दोषके दूरकरणे वास्तें प्रायश्चित्तकों मार्कंडेयऋषि कहताहै सामर्थ्यके होयां २ जो पुरुष इनां अपणे संबंधियांकों त्यागताहै सोकाकजन्मकों प्राप्तहोकर वारंवारदुःखी होताहै १ ॥ एकमास पर्यंत जो त्यागताहै सो पंचगव्यके पीणेकर्के शुद्ध होताहै और जोर पुरुष छे६ मास पर्यंत संबंधीयांकों त्यागताहै सो स्वर्णकृच्छ्रव्रतकर्के शुद्ध होताहै और वर्ष पर्यंत संबंधियांके त्यागविषे औदुम्बर कृच्छ्र कहाहै और वर्षतें अधिक त्यागविषे चांद्रायण व्रतकहाहै ॥ २ ॥ अबप राशरजीकावचनहै औविति औंदुंबर व्रतविषे चावलांकों वासांकीकों जैसे विधिहै कि वारां१२

तत्प्रायश्चित्तमाहमार्कण्डेयः ॥ सतिसामर्थ्येत्यजेद्यस्तुएतान्वन्धुजनान्स्वकान् सकाकयोनिमासाद्यदुःखीभूयात्पुनःपुनः १ ॥ मासंत्यक्त्वापंचगव्यं षण्मासान्स्वर्णकृच्छ्रकृत् वत्सरऔदुम्बरंप्रोक्तमर्वाकूचान्द्रायणंपरम् २ ॥ पराशरः औदुम्बरेतंडुलानांश्यामाकान्वायथाविधि दशद्वेधाविभज्यैवप्रत्यहंपाचयेद्व्रती ॥ १ ॥ दशद्वेधाद्वादशधेत्यर्थः ॥ औदुम्वरैःशुष्कपर्णैःपाचयेन्नान्यदारुभिः औदुम्वरैश्चपर्णैश्चआर्द्रैःपात्रमुदाहृतम् ॥ २ ॥ तत्रनिक्षिप्यतंग्रासंविष्णवेपूर्वमादिशेत् चतुर्थकालआयातेपूर्ववन्नियमंचरेत् ॥ ३ ॥ ग्रासवचननियमादिकमित्यर्थः॥ एवंग्रासाद्वादशस्युर्द्वादशाहानिभक्षयेत् अत्रापिगौःप्रदातव्यापंचगव्यंपिवेत्ततः ॥ ४ ॥

विभागकर्के दिन दिनविषे वारां दिन पर्यंतव्रतीपकावे दशद्वेधा क्या वारां१२ हिस्सें करे ॥ १ ॥ गूलरवृक्षके शुष्कपत्रां कर्के पकावे होरी काष्ट कर्के न पकावे और गूलरपत्रां कर्के मिश्रिव जो गलाहके पत्ता तिनां कर्के पात्र बनावे ॥ २ ॥ तिस पात्रविषे तिसग्रासकों रखके विष्णु तांई पहले अर्पण करे और पीछे चौथे पहर विषे पूर्वकी न्यांई नियम करें क्या भक्षण करें नियम कर्के ग्रासादिके भक्षणका विधान आनणा ॥ ३ ॥ इस प्रकार वारां ग्रासहैं वारां १२ दिन वार्ने और इस विषे भी पंचगव्यका पान करे और एक गौदान करणे योग्यहै ॥ ४ ॥

एवमिति एह औदुम्वर नाम कृच्छ्र व्रतकहाहै सो विशेषकर्के करणे योग्यहै मौनव्रतविषेयुक्तहोके उत्तमग्रासका भक्षण करे ॥ ५ ॥ और हस्थां पादांकोंधोके दोबार आचमन करे विधिकर्के फेर सायंकालविषें कर्मकों करे तिसतैं पीछे नारायणके आगें शयन करे ॥ ६ ॥ फेर प्रातःकालविषें निर्मलहोकर दूसरे दिनकीकृत्यकों पूर्वकीन्याईंकरे ऐसें शास्त्रकर्के कहीजो विधि तिसकेकरणेकर्के शुद्धिकों प्राप्त होताहै ॥ ७ ॥ इसतें उपरंत औदुम्वरकृच्छ्रका प्रत्याम्नायकहाहै तिसविषें देवलजी का वचनहै औदुम्वरेति औदुम्वर कृच्छ्रका प्रत्याम्नायपुरुषांकों श्रेष्ठकहाहै तिसके करणेकर्के संपूर्ण फलकोंप्राप्तहोताहै । १ । अव मार्कंडेयजीकावाक्यहै प्रत्येति हेरामपूर्वं औदुम्वरकृच्छ्रकाप्रत्याम्नाय

एवमौदुम्वरंकृच्छ्रंकर्तव्यंचविशेषतः भक्षयेदुत्तमंग्रासंमौनव्रतपरायणः ५॥ पादौप्रक्षाल्यपाणीचद्विराचम्यविधानतः सायाह्निकंततःकृत्वास्वपेन्नारायणाग्रतः ॥ ६ ॥ पुनःप्रभातेविमलोद्वितीयंपूर्ववच्चरेत् एवंशास्त्रोक्तविधिनाकृत्वाशुद्धिमवाप्नुयात् ॥ ७ ॥ अथौदुम्वरकृच्छ्रप्रत्याम्नायः॥ तत्रदेवलः ॥ औदुम्वरस्यकृच्छ्रस्यप्रत्याम्नायःपरंनृणाम् तस्याचरणमात्रेणसंपूर्णफलमश्नुते ॥ १ ॥ मार्कंडेयः ॥ प्रत्याम्नायःपुरारामजामदग्न्येनभाषितः मातृहत्याविशुद्ध्यर्थंकिमुतान्यस्यपापिनः ॥ १ ॥ राजविजये ॥ कृच्छ्रस्यौदुम्वरस्यास्यप्रत्याम्नायोमहानयम् सर्वपापविशुद्ध्यर्थंसृष्टवान्पद्मभूः पुरा १ ॥ चतुर्विंशतिमते ॥ औदुम्वरस्यकृच्छ्रस्यप्रत्याम्नायस्यलक्षणम् अष्टगावःप्रदातव्याःसालंकाराःसुलक्षणाः १ ॥ हेमशृंग्योरौप्यखुराःकांस्यदोहनसंयुताः सर्वपापविनिर्मुक्तःसंपूर्णफलमाप्नुयात् ॥ २ ॥

मातृहत्याकीशुद्धिवास्ते परशुरामनेंकथनकीताहै अन्यपापीकाक्या कहणाहै । १ । राजविजयग्रंथ विषें कहाहै कृच्छ्रेति इसऔदुम्वरकृच्छ्रकाएहप्रत्याम्नाय श्रेष्ठहै संपूर्णपापांकी शुद्धि वास्ते इसकों पूर्वब्रह्माउत्पन्न करताभया ॥ १ ॥ चतुर्विंशति मतविषें कहाहै औदुंवरकृच्छ्रके प्रत्याम्नायकेलक्षण कों कहतेहैं अठ ८ गौयां देणेयोग्यहैं कैसीयां गौयां जो शोभाकर्के युक्तहैं और श्रेष्ट लक्षणा वालियांहैं ॥ १ ॥ और सुवर्णके शृंगों कर्के युक्त और रजत खुरां कर्के युक्त कांस्यके दोहन पात्र कर्के युक्त तिनां गौयांके देणे कर्के संपूर्ण फलकों प्राप्त होता है ॥ २ ॥

इसतें उपरांत माहेश्वरकृच्छ्रका लक्षणकहाहै कृच्छ्रमिति माहेश्वरनामककें जो कृच्छ्रव्रतहै सो संपूर्ण पापांके नाशकरणेवालाहै इसमें गाथाकहतेहैं पूर्वशिवजीक्रोधकरके कामदेवकों यद दाहकरते भये तां शिवजीमें वडादोषहोताभया ॥ १ ॥ तिसदोषके दूरकरणेवास्तेंब्रह्माकों पुछताभयाहेदेव कामकें दाहकरणेतें मेरेविषें बहुतदोषस्थितहै तिसदोषकेदूरकरणेवास्तेउपायकहो। २। ब्रह्माजीकहतेभये सर्वोत्तें संपूर्ण दोषांके दूरकरणे वाला और संपूर्ण उपद्रवांके नाशकरणेवाला और पुरुषांकों संपूर्ण पुण्यके देणेवाला और संपूर्ण स्नानका फलदेणे वाला और बहुत श्रेष्ठहै ॥ ३ ॥ प्रातरिति प्रातः काल विषें दंतधावनकों करकें स्नानको करे और जैसें योग्यहै तैसें संध्या वंदनआदिक

* अथमाहेश्वरकृच्छ्रलक्षणम् ॥ कृच्छ्रंमाहेश्वरंनामसर्वपापप्रणाशनम् पुराकंदर्पदहनेमहान्दोषोभवेद्यदा ॥ १ ॥ तद्दोषपरिहारार्थंब्रह्माणंपर्य्यपृच्छत पंचवाणस्यदहनान्महान्दोषोमयिस्थितः ॥ २ ॥ तद्दोषपरिहारार्थंनिष्कृतिर्देवकथ्यताम् ॥ ब्रह्मा ॥ सर्वदोषप्रशमनंसर्वोपद्रवनाशनम् सर्वपुण्यप्रदंन्हणांसर्वस्नानफलंमहत् ॥ ३ ॥ प्रातःस्नात्वायथाचारंदंतधावनपूर्वकम् तावन्नारायणंस्मृत्वापूर्ववत्पापमोचनम् ॥ ४ ॥ यदामंदायतेभानुस्तदाकापालमुद्वहन् श्रोत्रियाणांचविप्राणांगृहेपुत्रिषुसंख्यया ॥ ५ ॥ शाकंभक्ष्यंफलंवापियथासंभवमादरात् आनयित्वाथदेवायसमर्प्यविधिपूर्वकम् ॥ ६ ॥ भक्षयेत्तानिसर्वाणिवाग्यतोन्नमकुत्सयन् हस्तौपादौतुप्रक्षाल्यद्विराचम्यशुचिःस्ततः ॥ ७ ॥ सायंकालेस्वपेन्नाथसमीपेनियतावसेत् ततःप्रातःसमुत्थायपूर्ववत्सर्वमाचरेत् ॥ ८ ॥

कर्मांकों करे तां फेर पापांके नाशकरणे वालेजो विष्णु तिनांको पूर्वकीन्याईं स्मरण करे ४ ॥ और यद सूर्यका तेज मंददोवे तद कापालको ग्रहणकरके वेदपाठी जो ब्राह्मणतिनांके तीनगृहां विषें संख्याकरकें ॥ ५ ॥ भक्षण करणेकेयोग्य जो शाकवायुआदिक और फलकदली आदिकहै जैसें प्राप्तहोवे भिक्षा तिसकों आदरतेंल्यावे और विधि पूर्वक विष्णुके तांईं अर्पणकरकें ॥ ६ ॥ भक्षणकरे संपूर्णानूं मौनधारके अन्न निंदा न करे हस्थ और पादांको शुद्धकरकें दोवार आचमन करे ऐसें शुद्ध होके ॥ ७ ॥ रात्रिविषे विष्णुके समीप शयन करे इंद्रियांकों रोकके तिसते उपरत दूसरे दिनविषे प्रातःकाल उठके पूर्वकी न्याईं संपूर्ण नियम करे ॥ ८ ॥

गौरीति एकगो श्रेष्ठब्राह्मण केताईं देवे कर्मांके फलकी प्राप्तिवास्ते पीछे पंचगव्यनूं पीवे एह माहेश्वर कृच्छ्रकहाहै । ९ । हेभगवन् इसव्रतकों कर संपूर्णदोषांकी शांतिवास्ते श्रौर संपूर्ण पापांके दूरकर णेवास्ते श्रौर संपूर्णकल्याणांकी प्राप्ति वास्ते । १० । श्रैसे श्रवणकर्के महादेव व्रतकों करता भया इसी कर्के इसका नाम माहेश्वर व्रत है महेश्वर जीने प्रकाशित कीताहै श्रौर इस माहेश्वर कृच्छ्रके करणेकर्के ब्राह्मण श्रादि वर्ण पापतें रहितहोताहै । ११ ॥ श्रव माहेश्वरकृच्छ्रकाप्रत्या म्नायहै तिसविषे देवलजीका वाक्यहै मेति माहेश्वर नामकर्के जो कृच्छ्रव्रत तिसके वदलेनूं श्रवण कर कैसा वदलाहै संपूर्ण पापांके दूर करणे वाला श्रौर संपूर्ण कृच्छ्र फलकेदेणे वालाहै १ ॥

गौरिकाद्विजवर्य्यायदेयाकर्म्मफलाप्तये पंचगव्यंपिवेत्पश्चात्कृच्छ्रंमाहेश्वरं विदम् ॥ ९ ॥ कुरुष्वचैनंभगवन्सर्वदोषोपशांतये सर्वपापविनिर्मुक्तैश्चस र्वश्रेयोभिवृद्धये ॥ १० ॥ एवंकृत्वातदादेवोमहेशानस्तथाकरोत् एतस्याचर णेनैवद्विजः पापात्प्रमुच्यते ॥ ११ ॥ ॥ अथमाहेश्वरकृच्छ्रप्रत्याम्नायः ॥ तत्रदेवलः ॥ माहेश्वराख्यकृच्छ्रस्यप्रत्याम्नायमिमंशृणु सर्वपापोपशम नंसर्वकृच्छ्रफलप्रदम् ॥ १ ॥ ब्रह्महत्यादिशमनंसर्वग्रहनिवारणम् तुलाप्र तिग्रहीतॄणांपापनाशनहेतुकम् ॥ २ ॥ संध्यादिनित्यकर्म्माणिपरित्यक्ता निसूरिभिः तेषांविशोधनेदक्षंसर्वपापहरंनृणाम् ॥ ३ ॥ गावोदेयाद्विजा तिभ्योह्यर्चितावस्त्रभूषणैः हेमघंटादिभिःशुभ्रैरलंकारैरलंकृताः ॥ ४ ॥ स्वर्णशृंग्योरौप्यखुराःकांस्यदोहनसंयुताः रुद्रसंख्याःसवत्साश्चपयस्वि न्यःपृथक् पृथक् ॥ ५ ॥

श्रौर ब्रह्महत्यादि पापके दूर करणेवाला श्रौर संपूर्ण ग्रह वलके दूर करणेवाला श्रौर तुलादान केग्रहण करणे वाले जो पुरुष हैं तिनांके पापके नाशका हेतुहै ॥ २ ॥ श्रौर जिनों बुद्धिमानोंनें संध्यावंदनादि कर्मत्यागेहैं तिनांके शुद्धकरणेविषे दक्षहै श्रौर पुरुषांके संपूर्णपापांका नाशकहै सो प्रत्याम्नाय कहतेहां ॥ ३ ॥ गोलि गोयां याने ११ देणे योग्यहैं ब्राह्मणांकेताईं भिन्नभिन्न कैसीयां गोयां वस्त्र भूषणां कर्के युक्त श्रौर सुवर्णके घंठे श्रादि जो श्वेत श्रलंकार तिनां कर्के युक्त ४ ॥ श्रौर सुवर्णके शृंग श्रौर रुपेकेखुर श्रौर कांस्यका दोहनपात्र तिनांकर्के युक्तसहित वछुयां के श्रौर दुग्ध देण वालीयां ॥ ५ ॥

श्रोति प्रत्याम्नाय विधिविषे गोयां ११ बहुत श्रेष्ठहैं रुद्रसंज्ञाक्यारुद्रहैं देवता जिनांकाऐसयांहैं कि सवास्तेरुद्रकृच्छ्रके फलकी प्राप्तिवास्ते और संपूर्णपापांके दूरकरणेवास्तेहै ६ एवमिति ऐसे जो द्विज प्रत्याम्नायनूं यथाविधिकर्के कर्ताहै तिसकों संपूर्णकृच्छ्रका फलप्राप्तहोताहै जो फलमुनियांनें कहाहै ॥ ७ ॥ अब ब्रह्मकृच्छ्रका लक्षणहै तिसविषे देवलजीका वाक्यहै हेसंपूर्णमुनीश्वरो अब सु करो ब्रह्मकृच्छ्रके लक्षणनूं निंदित अन्नके भक्षण करणे विषे जो पापहै और दुष्ट दानके ग्रहण करणेविषे जो पापहै ॥ १ ॥ और नहिपीणेयोग्य जो विनावच्छेके गौकादूधआदिवस्तु तिसके पीणेविषे जो पापहै और पूर्वकहि जो उग्रशांति तिसविषे जो अन्न और शूद्रकाअन्न ॥ २ ॥ और मठका स्वामी जो संन्यासी तिसका अन्न और छींबेका अन्न और वृषलीक्याशुद्रीकाव नायहोया अन्न और ऋतुमतीस्त्रीकावनायाहोया अन्न । ३ । और विधवास्त्रीककर्के पकाअन्न और

प्रत्याम्नायविधौशस्तारुद्रसंज्ञामहत्तराः रुद्रकृच्छ्रफलप्राप्त्यैसर्वपापापनुत्तये ॥ ६ ॥ एवंकृत्वाद्विजोयस्तु प्रत्याम्नायंयथार्हतः तस्यसम्पूर्णकृच्छ्रस्यफलंमुनिभिरीरितम् ॥ ७ ॥ ॥ अथब्रह्मकृच्छ्रलक्षणम् ॥ तत्रदेवलः ॥ शृणुध्वंमुनयस्सर्वेब्रह्मकृच्छ्रस्यलक्षणम् दुरन्नेनैवयत्पापंपापंदुष्टप्रतिग्रहे ॥ १ ॥ अपेयपानेयत्पापंयत्पापंदुष्टभोजने शांत्यन्नेषुचयत्पापंयत्पापंशूद्रभोजने ॥ २ ॥ संन्यासिनोमठपतेर्भोजनेयद्भवेन्नृणाम् यत्पापंरजकस्यान्नेयत्पापंवृषलीकृते ॥ ३ ॥ यत्पापंपुष्पवत्यन्नेयत्पापंविधवाकृते अमंत्रकेपैतृकान्नेयदनारायणीकृते ॥ ४ ॥ चौलेचपैतृकेचैवदीक्षितस्यैवभोजने सूतकद्वितयेचैवतथादुःपंक्तिभोजने ॥ ५ ॥ तथैवदुष्टसंघान्नेतथा क्रीतान्नभोजने पापपर्युषितचान्नेतथातद्रसकस्यच ॥ ६ ॥ यत्पापमनृते प्रोक्तमौपासनविवर्जिते एवमादीनिपापानिलघूनिचमहांतिच सर्वेषांहिविनाशायब्रह्मकृच्छ्रंविकात्थितम् ॥ ७ ॥ शान्त्यन्नमत्रपूर्वोक्तोग्रशान्तिभवंबोध्यम् यदनाराणीकृते नारायणाग्रेऽनिवेदितइत्यर्थः

मंत्रतें रहितपितरांका अन्न और नारायणकेतांई जो नहिअर्पणकीता अन्न । ४ । और चौलकर्मका अन्न और पितरांके निमित्त जो पहलीक्रियातिसका अन्न और यज्ञकी दीक्षा विषे युक्तका अन्न और सूतक मृतसूतकका अन्न और दुष्टपुरुषांकी पंकि विषे भोजन कीताजो अन्न ५ ब्राह्मण और दुष्टांके समूहका अन्न और अन्नके वेचण वालेका अन्न और बासी अन्न और रसके वेचण वालेका अन्न ॥ ६ ॥ इनां संपूर्णके सिद्धहोये होये अन्नकों भक्षण करणे विषे जो पाप है और जो असत्यवाणी विषे पाप है और जो पाप देवताकी उपासनाते रहित पुरुष विषे कहाहै इसते आदिके जो पापहैं थोडे वा बहुत तिनां पापांके दूर करणे वास्ते ब्रह्मकृच्छ्र व्रत कहाहै ॥ ७ ॥

अब मार्कंडेयजीका वचनहै गविति गोमूत्र और गोमय और दुग्ध और दधि और घृत और कुशा का जल इनांकों पूर्वमानकर्के एकत्र करे शुद्धि कों कर्के सो शुद्धि इस जगा पंचगव्यके मंत्रां कर्के जानणी इसीरीतिसें दिनदिनविषे पानकरे ॥ १ ॥ ऐसे पूर्वकीन्याई स्नानादिको कर्त्ताहुआ बारां दिनां १२ का कृच्छ्र व्रत करे तिसी विधिकी कहतेहैं प्रातरिति प्रातः काल विषे स्नानको कर्के जैसे समाहै तैसें नित्यकर्मकों समाप्तकर्के ॥ २ ॥ देवताके मंदिर विषे तैसे गोयांके स्थान विषे व्रती पंचगव्यका पान करे इसका परिमाण कहतेहैं गविति अठ ८ मासे गोमूत्र और सोलां १६ मासे गोमय ॥ ३ ॥ और अठ ८ मासे दुग्ध और त्रय ३ मासे दधि और त्रय ३ मासेघृत और कुशाका जल ॥ ४ ॥ तिस तिस मंत्र कर्के

मार्कण्डेयः। गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् संपाद्यपूर्वमानेनप्रत्यहंशुचिपूर्वकम् ॥ १ ॥ द्वादशाहंचरेत्कृच्छ्रंपूर्ववत्स्नानमादितः प्रातःस्नात्वा यथाकालंनित्यकर्मसमाप्यच ॥ २ ॥ देवागारेतथागोषेपंचगव्यंपिवेद्व्रती गोमूत्रंमाषकान्यष्टौगोमयस्यतुषोडश ३ ॥ क्षीरंमाषाष्टकंज्ञेयंदधिमाषत्रयं तथा घृतंमाषत्रयंप्रोक्तंतथैवचकुशोदकम् ४ तत्तन्मंत्रेणसंयोज्यंतत्तन्मंत्रेणहावयेत् होमशेषंपिवेत्पश्चाद्रवौमध्याह्नगेसति ५ आसायंमनसाविष्णुं स्मरन्सर्वेश्वरंप्रभुम् स्वपेद्देवसमीपेतुगन्धताम्बूलवर्जितः ६ ततःप्रातःसमुत्थायपूर्ववद्व्रतमाचरेत् एवंद्वादशरात्राणिचरेद्व्रतमनुत्तमम् ७ महापापंचोपपापंमद्यपानसमंतथा तत्सर्वंविलयंयातिहरिनाम्नोऽसुरायथा ॥ ८॥

तिनांकों इकठया करे और तिस तिस पंचगव्यके मंत्रांकर्के हवनकरे और हवनशेषकों पीवे सूर्य के मध्यान्हग होयां २ ॥ ५ ॥ और सायंकालपर्यंत सर्वेश्वर जो विष्णु तिनांकों स्मरणकरे और देवताके समीपविषे शयनकरे और सुगंधि वस्तु और तांबूल इनांकोंत्यागे ॥ ६ ॥ तिसतें उपरंत प्रातः काल विषे उठ कर्के पूर्वकी न्याई व्रत नूं करे ऐसे उत्तम व्रतकों बारां दिनकरे ॥ ७ ॥ और महापाप और उपपाप और मदिराके पीने के पापके तुल्य जो पाप एह संपूर्ण पाप ब्रह्मकृच्छ्र व्रत कर्केनष्ट होतेहैं जैसे हरिके नामतें दैत्य दूर होतेहैं ॥ ८ ॥

इसतें उपरांत ब्रह्म कृच्छ्रका प्रत्याम्नायहै तिस विषे देवल जीका वाक्य है हेब्रह्मनुने तूं ब्रह्मकृच्छ्रके आश्चर्य प्रत्याम्नायनूं श्रवणकर जिसके करणे करके महापापां तें और उपपातकांतें रहित होताहै ॥ १ ॥ ब्रह्म कृच्छ्र है नाम जिसका सो महा पापांके दूर करणे वाला है तिसकों करे तिस विषे असमर्थ होवे तां फलकी प्राप्ति वास्ते प्रत्याम्नायनूं करे ॥ २ ॥ प्रत्याम्नाय विषे भी पुरुष महाकृच्छ्रकेफलनूं प्राप्तहोताहै अठ ८ गौयां देणीयां य्यहैं पूर्वकी न्याई स्वर्णके शृंगादिककर्के अलंकृत ॥ ३ ॥ वेदके पठनकरणेविषे युक्त जो ब्राह्मण

॥ अथब्रह्मकृच्छ्रप्रत्याम्नायः ॥ तत्रदेवलः ॥ शृणुब्रह्मुनेचित्रंप्रत्याम्नायं प्रजापतेः यत्कृत्वामुच्यतेपापैर्महद्भिरुपपातकैः १ । प्रजापतेर्ब्रह्मकृच्छ्रस्य आचरेद्ब्रह्मकृच्छ्राख्यंमहापातकशोधनम् असमर्थःप्रकुर्वीतप्रत्याम्नायंफलाप्तये ॥ २ ॥ प्रत्याम्नायेमहाकृच्छ्रफलंप्राप्नोतिमानवः अष्टौगावःप्रदातव्या.पूर्ववत्स्वर्णभूषिताः ॥ ३ ॥ विप्रेभ्योवेदविद्भ्यश्चपृथक्पृथगलंकृताःपयस्विन्यःशीलवत्यःसर्वदोषविमुक्तये ॥ ४ ॥ मार्कंडेयः ॥ प्रत्याम्नायंतदाकुर्यादशक्तःप्रजापतेः अष्टौगावःप्रदातव्याःस्वर्णशृंग्यःपयोमुचः ॥ १ ॥ विप्रेभ्योवेदविद्भ्यश्चसर्वकृच्छ्रफलाप्तये एवंकृत्वाद्विजःसम्यक्फलमाप्नोतिकृत्स्नशः ॥ २ ॥

तिनांके तांई भिन्न भिन्न शोभाकर्के युक्त और दुग्धदेणे वालियां और शीलस्वभाव वालियां संपूर्ण दोषांके दूर करणे वास्ते ॥ ४ ॥ अब मार्कंडेयजी का वचनहै प्रति प्रत्याम्नायनूं तां करे जेकर ब्रह्मकृच्छ्रके करणे विषे असामर्थ्य होवे स्वर्णके शृंगांकर्के युक्त दुग्ध देण वालियां अठ ८ गौयां देणे योग्यहैं ॥ १ ॥ वेदके जानणे वाले जो ब्राह्मण तिनांके तांई संपूर्ण कृच्छ्र व्रत के फलकी प्राप्ति वास्ते असे करणे करके ब्राह्मणआदि वर्ण संपूर्ण फलकों प्राप्त होताहै ॥ २ ॥

अथेति इसते अनंतरधान्यकृच्छ्रका लक्षणहै तिसविषै देवलजीका वाक्यहै धान्येति तुसांताई धान्य कृच्छ्रका स्वरूप और लक्षण कहताहां संपूर्णकृच्छ्र व्रतांके करणाविषे जो असमर्थहे सो पुरुषधा न्यकृच्छ्रव्रतकों करे ॥ १ ॥ इसविषे मार्कंडेयकावचनहै तमिति तप्त कृच्छ्रव्रतते आदि लेके जो संपूर्ण कृच्छ्र व्रत हैं तिनांके करणेकी इच्छावाला जेकर कोई धनवाला होवे वा राजाहोवे तां धान्य कृच्छ्रव्रतकों करे जोजो मैंने कृच्छ्रव्रत कहाहै तिनां संपूर्णांके करणेकी इच्छावाला जेकर होवेतां ॥ १ ॥ खारीति खारी परिमित जो महाधान्यहै तिसके पांचमें ५ हिस्सेकों ग्रहण करे जो खारेका एक भी भाग है तिसका नाम कृच्छ्र धान्य कहाहै । २ । तिसधान्यकों हिस्सेकर्के देवे

अथ धान्यकृच्छ्रलक्षणम् ॥ तत्रदेवलः ॥ धान्यकृच्छ्रस्वरूपंचलक्षणंप्रवदा मिवः सर्वेषामेवकृच्छ्राणामशक्तोधान्यमाचरेत् ॥ १ ॥ मार्कंडेयः ॥ तप्तादिसर्वकृच्छ्राणांकर्तुंयदिमहान्प्रभुः धान्यकृच्छ्रंतदाकुर्याद्यद्यत्कृच्छ्रंम योदितम् ॥ १ ॥ यद्यद्यत्कृच्छ्रंमयाकथितंतेषांसर्वेषांस्थानेइदमेवकुर्य्यादि त्यर्थः ॥ कश्चिन्महाधनीवाप्रभूराजाकर्तुमिच्छेत्तदाधान्यकृच्छ्रंकुर्य्यादि त्यर्थः । खारीधान्यस्यमहतःपंचधाभागमाहरेत् कृच्छ्रस्यैकस्तुयोभागःस कृच्छ्रंधान्यमीरितम् ॥ २ ॥ तद्धान्यंभागशोदद्यात्तत्कृच्छ्रंमुनिभिःस्मृतम् तत्कृच्छ्रमाचरेद्विप्रःसंपूर्णफलमश्नुते धान्यवृद्धेर्महाराज्ञःकृच्छ्रंपापापनुत्त ये ॥ ३ ॥ मरीचिः ॥ खारीधान्यस्यपंचांशोधान्यकृच्छ्रमुदाहृतम् अतो न्यूनंनकर्तव्यमन्यथादानमीरितम् ॥ १ ॥

सो मुनियोंने कृच्छ्र व्रत कहाहै इसमे एह अभिप्रायहै कि पंचभागकर्के कर्मते दान करणा जद समग्र दान हो जावेगा तद कृच्छ्रभी पूरा होवेगा अथवा एक खारीके पंच कृच्छ्र होतेहैं तिस कृच्छ्र धान्यनूं ब्राह्मण करे तां संपूर्ण फलकों प्राप्त होनाहै धान्यकी वृद्धि कर्के युक्त जो महारा जाहै तिसकों पापांके दूर करणे वास्ते एह धान्य कृच्छ्र व्रत कहाहै ॥ २ ॥ अब निर्धन पुरुष वास्ते मरीचिऋषिका वचनहै खारीति खारी परिमाण धान्यका पांचमां हिस्सा धान्य कृच्छ्र कहाहै इसतें न्यून क्या घट नहि करणे योग्य जेकर घट होवे तिसका नाम दान कहाहै ॥ १ ॥

अब इसीमें लोगाक्षिऋषिकावचनहै पंचेति खारी प्रमाण महाधान्यका पंचमां५हिस्साधान्य कृच्छ्रकहाहै इसप्रमाणतें घटहोवे तां धान्यदानकहाहै सो पुण्यके देणेवालाहै और कृच्छ्रधान्यकेफल वालामहिहोता ॥ १ ॥ और इसीकास्पष्टार्थहै संपूर्ण धान्य कृच्छ्रका पंचमां हिस्सा नहि करणा चाहिए जेकर तिस धान्यतें हीन होवे तां कृच्छ्रकाफल नहि होता ॥ २ ॥ इसमें ऐसा अर्थ है कि राजादिकों सारी खारीके देणेसे धान्यकृच्छ्र हुंदाहै और निर्धनको तिसके पांचमे हिस्सेके देणेसे एह होता अब कहतेहै कि राजा खारीसे न्यून न करे और दूसरा पांचमांसे थोडा न देवे हे ब्राह्मणांविषे श्रेष्ठ इस धान्य कृच्छ्रका वदला नहि कहा स्वर्णकृच्छ्र व्रत और धान्य कृच्छ्र व्रत एह

लौगाक्षिः ॥ पंचमांशोधान्यकृच्छ्रंखारीधान्यस्यभूयसः अन्यथाधान्यदानंस्यात्कृच्छ्रशब्देनपुण्यभाक् ॥ १ ॥ संपूर्णधान्यकृच्छ्रस्यपंचमांशोनविद्यते तेनहीनंधान्यदानंनकृच्छ्रफलमश्नुते ॥ २ ॥ कृच्छ्रस्यैतस्यविप्रर्षे प्रत्याम्नायोनविद्यते स्वर्णकृच्छ्रस्यधान्यस्यसमर्थस्यमहात्मनः ॥ ३ ॥ प्रत्याम्नायोनगदितोमुनिभिर्धर्मवत्सलैः धान्यशब्दोव्रीहाएवकृच्छ्राणां न धान्यांतरम् । केचिच्छ्यामाकधान्यमितिवदंति ॥ मनुः ॥ नीवाराव्रीहयो धान्यंश्यामाकाःकृच्छ्रसाधनम् नधान्यांतरमस्तीहप्रभूतकृच्छ्रसाधनमिति १ ॥ ● अथसुवर्णकृच्छ्रम् ॥ तत्रदेवलः ॥ ब्रह्महत्यादिपापानामितरेषांमुनीश्वराः तुलादिष्विहदानेषुग्रहीतॄणांविशोधनम् ॥ १ ।

दोंव्रत समर्थ पुरुषकों कहनें । ३ । इनांकाधर्म वत्सल जो मुनि तिनांने वदला नाहे कहा धान्य शब्द करके व्रीहि कहने कृच्छ्र विषे होर धान्य नाहि कहे कै एक ऋषि श्यामाक धान्यकों कहतेहैं कि धान्य कृच्छ्रमे सामर्थ्य न होवे तां श्यामाक उसकी जगादेणे इसी विषे मनुजीका वाक्यहै नीति सवांक और चावल और सांकी एह कृच्छ्र व्रत विषे कहेहैं होर धान्य कृच्छ्रके सिद्ध करणे विषे नहि कहे ॥ १ ॥ ※ इसतें अनंतर सुवर्ण कृच्छ्र कहाहै तिस विषे देवल जीका वाक्य है ब्रह्मेति ब्रह्महत्या आदिक जो पापहैं और इतर जो पापहैं और तुलाआदि दानांकों जो ग्रहण करण वालेहैं तिनां संपूर्णांकों शुद्ध करणे वाला एह स्वर्ण कृच्छ्र कहाहै १ ॥

महेति महाप्रभुकों वराहपरिमाणसुवर्णकहाहै और मध्यमपुरुषकों वराह परिमाणतेंअर्द्धा सुवर्ण देणाकहाहै और जोनिर्धनहैं तिनांकों वराहपरिमाणतें चौथाहिस्साकहाहै तिसतेंन्यून न करे २ ॥ क्योंकि तिसतें जो न्यूनहै सो सुवर्ण दानकहाहै तिसकेदेणवालेकों सुवर्णकृच्छ्रकाफलनाहिहोता १ । इसमे मरीचिऋषिकावचनहै वेभि राजाधनीनिर्धनकों इसव्यवस्थासे वराहपरिमाणसुवर्णहोवे तां सुवर्ण कृच्छ्रकहाहै और तिसतें अर्द्धभी सुवर्ण कृच्छ्रकहाहै वराहपरिमाणतें चौथाहिस्साभी कृच्छ्र है तिसते न्यून होवे तां सुवर्णदान कहाहै उसमे कृच्छ्रशब्दनाहि कहा इहां वराहशब्दका अर्थ मानपरिभाषा विषे देखलेना ॥ १ ॥ और धनी पुरुष वराह परिमाणतें अर्द्ध सुवर्ण का कृच्छ्र करे जो असमर्थ इसके प्रत्याम्नायकी इच्छा करे तिस वास्ते कहतेहैं प्रत्येति इसकाप्रत्या

महाप्रभोर्वराहः स्यात्तदर्धंमध्यमस्यहि तदर्धमितरेषाचततोन्यूनंनकारयेत् २ ॥ ततोन्यूनंसुवर्णदानमात्रं न कृच्छ्रशब्दः। मरीचिः। वराहस्यतदर्धंचतदर्द्धंकृच्छ्रमीरितम् ततोन्यूनंदानमात्रंकृच्छ्रशब्दोनगद्यते ॥ १ ॥ वराहशब्दार्थोमानपरिभाषायांद्रष्टव्यः ॥ प्रभुमात्रेतदर्धंस्यात्प्रत्याम्नायोनविद्यते मरणांतप्रायश्चित्तानां ब्रह्महंतॄणामकृतनिष्कृतीनामितरेषांरहस्यकृतपापानामकृतनिष्कृतीनां तुलादिसंग्रहीतॄणां यागादिकरहितानां चतुर्भागव्ययाद्यकृतानां कालपुरुषादिप्रतिग्रहीतॄणांतत्तदुक्तसुवर्णकृच्छ्राचरणेन तत्पापक्षयोभवति॥ राजविजये॥ प्रमाद ब्रह्महंतॄणामितरेषांप्रभूयसा प्रायश्चित्तेनहीनानां सुवर्णकृच्छ्रमीरितम् ॥ १ ॥

म्नाय नहि मरण पर्यंतहै प्रायश्चित्त जिनांका ऐसे जो ब्राह्मणके मारणवाले और इतर जो पापीहैं नहि कीती शुद्धि जिनानें ऐसे जो गुप्त पापके करण वाले और तुलाआदि दानके ग्रहण करण वाले और पंचयज्ञ आदि कर्मतें जो रहित हैं और दानकों ग्रहणकर्के जो चतुर्थांश ब्राह्मणके तांई नहि देते और काल पुरुष आदि दानांके जो ग्रहण करण वाले तिनां संपूर्णांका पाप दूर होताहै सुवर्ण कृच्छ्र व्रतके करणेकर्के ॥ अब राज विजय ग्रंथ विषे कहाहै प्रेति प्रमादतें जो पुरुष ब्राह्मणका बध कर्तेहैं और इतर जो पापी हैं और जो बडे प्रायश्चित्त कर्के रहित हैं तिनांकी स्वर्ण कृच्छ्र व्रतकर्के शुद्धि कहीहै ॥ १ ॥

तुलेति तुलाआदिदानांके ग्रहणकरणवाले जों पुरुषहैं और दानके चतुर्थांश देणेकर्के जो शुद्धिहै तिससे रहितहैं तिनांकी शुद्धिवास्ते ब्रह्माने स्वर्णकृच्छ्र प्रायश्चित्त रचयाहै ॥ २ ॥ सुवर्णकी प्रशंसा करतेहैं स्वर्णमिति सुवर्ण ब्रह्मस्वरूपकर्के ब्रह्माजीने रचयाहोयाहै पुरुषोंके स्वर्णकृच्छ्र व्रतके करणेकर्के कौणपापहै जों नहि दूरहोता अर्थात् संपूर्णपाप दूरहोतेहैं ॥ ३ ॥ अब गौतमजीका वाक्यहै रहेति एकांतविषे ब्रह्महत्याके करणवाले जो पुरुष हैं हेराजन् श्रवणकर तिनांकी दशहजार१००००स्वर्णकृच्छ्र दानकर्के शुद्धिहोतीहै ॥ १ ॥ और प्रत्यक्ष जो ब्रह्महत्याके करण वालेहैं तिनकीशुद्धि मरणपर्यंत प्रायश्चित्तकर्के होतीहै परंतु इसजगा अयुतभी चार ४ गुणा जानणा अगले वचनते सो ४००००चालीहजार होवेगा एह स्वर्णकृच्छ्र राजाके योग्यहै होरकोई नाह

तुलादिसंग्रहीतॄणांरहितानांविशुद्धिभिः प्रायश्चित्तमिदंकृच्छ्रंब्रह्मणापरिकल्पितम् २ ॥ स्वर्णंब्रह्ममयंप्रोक्तंब्रह्मणानिर्मितंपुरासुवर्णकृच्छ्राचरणेकिमसाध्यंशरीरिणाम् ३ ॥ गौतमः। रहस्यकृतविप्रस्यहत्यायांशृणुपार्थिव अयुतस्वर्णकृच्छ्राणांदानेशुद्धिरवाप्यते ॥ १ ॥ रहस्यकृतपापस्यपापिभिःपरमार्थतः अयुतंपूर्ववज्ज्ञेयमन्यथामरणान्तिकम् २ ॥ प्रकाशकृतब्रह्महत्यानांमरणान्तिकंप्रायश्चित्तम् ॥ तद्रहितानांचतुर्भिरयुतकृच्छ्रैर्विशुद्धिरिति ॥ तदाहमनुः। प्रकाश्यविप्रहंतॄणांचतुष्कंपापनाशनम् निमित्ताकृतशुद्धीनांजपयागाभिषेचनैः ॥ १ ॥ निमित्तैः प्रायश्चित्तैरकृताशुद्धिर्येषांते तेषांचतुष्कंचतुर्गुणमयुतमित्यर्थः स्मृत्यन्तरम् ॥ तुल.प्रतिग्रहीतृविषये ॥ नदीस्नानादिनाराजंश्चतुर्भागव्ययेन वा ब्रह्मराक्षसमुक्त्यर्थंचत्वार्य्ययुतमाचरेत् १ ॥ चत्वार्ययुतकृच्छ्राणीत्यर्थः ॥

करसक्ता इसके रुपेए पूर्वोक्त वराहपरिमाणवाले स्वर्णके मुल्ल ४८०००० के हुंदेहैं मरणांतक प्रायश्चित्तको जो नहि कर्ते सो राजादि चालीहजार४००००स्वर्णकृच्छ्र कर्के शुद्ध होतेहै २ । तैसे मनुजीकहतेहैं प्रेति प्रकाश्य क्या नहि प्रत्यक्ष जो ब्राह्मणके वधको कर्तेहैं और गायत्रीजपादि प्रायश्चित्तांकर्के नहि होई शुद्धिजिनांकी तिनांके पापनाश वास्ते चाली हजार पूर्वोक्तस्वर्णकृच्छ्र किहाहै ॥ १ ॥ औरहोस्मृति विषे तुला दानके ग्रहण करणे विषे एहवाक्यहै नदीति हेराजन् नदीविषे स्नानादिकर्के और दानके चौथे हिस्सेके देणेकर्के वा दोष दूर करे अथवा ब्रह्मराक्षसगतिके दूरकरणे वास्ते चाली हजार ४०००० कृच्छ्र व्रतकोंकरे परंतु एह अनेक तुलाग्रहणविषे जानणा प्रायश्चित्तको बहुत होणेते ॥ १ ॥

प्रेति प्रभुकों उत्तमप्रकारकहाहै और मध्यमकों मध्यम और कनीयसकोंक्या छोटेकों पादप्रमाण कहाहै और नहि कीताउक्तप्रायश्चित्त जिनांनेंतिनांकी शुद्धिस्वर्णकृच्छ्रव्रतांके करणेकर्के होतीहै और उपपातकांके मध्यविषे जिस जिसपातकके दूरकरणेवास्ते जो जो कृच्छ्रव्रत कहेहैं तिनांके करण विषे सामर्थ्य न होवे तां तितनेस्वर्णकृच्छ्रव्रतांकर्के शुद्धिहोतीहै। अवयाज्ञवल्क्यजीकावचनहै उपेति उपपातकांकेसमूहके दूरकरणेवास्तेमुनियांनें जो जो प्रायश्चित्तकहाहै तिसकेकरणविषे समर्थ नहि होवेतां तितनेहि स्वर्ण कृच्छ्रव्रतकरे ॥ १ ॥ अव मरीचिकावाक्यहै समिति संकली करण पाप

प्रभोरुत्तमप्रकारोमध्यमस्यमध्यमप्रकारःकनीयसःपादप्रमाणतः। कृच्छ्राणिकृत्वात्वकृतप्रायश्चित्तानांशुद्धिर्भवति। उपपातकानांयस्ययस्यचपातकस्य यानियानिकृच्छ्राणि प्रतिपदोक्तानि तेषामाचरणाशक्तया तावद्भिः सुवर्णकृच्छ्रैःकृतैःशुद्धोभवति। याज्ञवल्क्यः। उपपातकजालानांमुनिभिर्यदुदीरितम् तत्तदाचरणाशक्तःतावत्कृच्छ्रंसमाचरेत् ॥ १ ॥ मरीचिः संकलीकरणेराजन्यस्ययस्ययथोदितम् तदाचरणशक्तस्तुफलमानंत्यमश्नुते ॥ १ ॥ अशक्तस्यद्विजस्यार्थंसुवर्णकृच्छ्रमीरितम् यद्यत्पापस्यय त्कृच्छ्रंमुनिभिःपरिभाषितम् ॥ २ ॥ तदाचरणाशक्तानां तावन्तिहिरण्यकृच्छ्राणि प्रभुत्वदारिद्र्यतारतम्येन कृत्वाशुद्धिर्भवतीत्यर्थः ॥ एवंचाण्डालादिगमनेषु कृच्छ्रसंख्यया हिरण्यकृच्छ्राचरणैस्तत्प्रतिपदोक्तैः पूर्वोक्तैः शुद्धोभवति ॥

विषे हेराजन जिस जिस पापका जो जो प्रायश्चित्त कहाहै तिसके करण विषे जो युक्तहै सो अनंत फलकों प्राप्त होताहै ॥ १ ॥ और जो ब्राह्मणादि असमर्थ है तिसकों सुवर्ण कृच्छ्र व्रत कहाहै ॥ २ ॥ इसी अर्थकों स्पष्टकर्के कहतेहैं यदिति और धनी पुरुष और निर्धन पुरुष सुवर्ण कृच्छ्र विषे अधिक और न्यून परिमाण कर्के शुद्धिकों प्राप्त होवेहैं ॥ २ ॥ इसी प्रकार चांडाल आदिकोयां स्त्रीयांके गमनकरणे विषे शुद्धिके निमित्त कृच्छ्रव्रतांकी संख्याकर्के कहे जो व्रत तिनांके प्रत्याम्नाय वास्ते उतनेहि स्वर्ण कृच्छ्र व्रतांकर्के शुद्ध होवाहै ॥

एवमिति इसी प्रकार निंदित अन्नके भक्षण विषे और उद्बंधन और मरणादिककें होयां २ उपनयनादि कर्म्मोंके मुख्यकालके त्याग विषे जो प्रायश्चित्त निरूपण कीताहै तिसकें बदले विषे तावत्संख्या करकें स्वर्ण कृच्छ्र व्रतके करणे करकें शुद्ध होताहै ऐसें संपूर्ण स्थान विषे जानणे योग्यहै ॥ तुला आदिक दानांके ग्रहण करण वाल्यां पुरुषांकों विशेष पैठीनसि कहताहै तुलेति तुलादान विषे जो धनकों ग्रहण कर्त्ताहै और तिस दानके चौथेहि हसेकों जो ब्राह्मणकेताईं नहि देता और लोकविषें निंदाके भयककें अभिषेक और जपभी नाहि कर्त्ता तिसकों ब्रह्मराक्षसगतिहोणीहै ब्रह्मराक्षस उसकों कहतेहैं जो ब्राह्मणोके मारण वाला राक्षस होवे इसमें एह अर्थ है कि राक्षसभावमे भी ब्राह्मणको मारेगा तो तिसहत्या

एवं दुरन्नभक्षणोद्बन्धनमरणादिषूपनयनकर्मणां मुख्यकालातिक्रमे प्रायश्चित्तंयन्निरूपितम् तावन्ति हिरण्यकृच्छ्राणि कृत्वा शुद्धोभवतीति सर्वं प्रयोजनीयम् । तुलादिप्रतिग्रहीत्रूणांविशेषमाह पैठीनसिः । तुलायांधन संधातायागंभागचतुष्टयम् अभिषेकंजपंवापिह्यकृत्वालोकनिंदया ॥ १ ॥ ब्रह्मराक्षसमुक्त्यर्थंकृच्छ्राण्येतानिसर्वशः चतुरयुतंप्रकुर्वीतधर्मशास्त्रोक्तमार्गतः ॥ २ ॥ पिशाचत्वविमुक्तिःस्यादिहलोकेपरत्रच सुवर्णकृच्छ्ररूपेणसर्वैपापैःप्रमुच्यते ॥ ३ ॥ हिरण्यगर्भसंधानेयोधर्मनिष्कृतिंविना चत्वारि कृच्छ्रसाहस्रंकृत्वाशुद्धिमवाप्नुयात् ॥ ४ ॥

करकें बहुत काल राक्षस हिरहेगा ॥ १ ॥ तिसके दूर करणे वास्ते इतनेंहि कृच्छ्र व्रत कहने संपूर्णताककें और धर्मशास्त्रककें कथनतें चालीहजार४००००सुवर्ण कृच्छ्रव्रतकरे २ ॥ तां पिशाच गति दूर होतीहै इसलोंकविषें और परलोक विषें सुवर्ण कृच्छ्रकें करणेककें संपूर्ण पापांते रहितहोताहै ॥ ३ ॥ और हिरण्य गर्भके प्रतिग्रहविषे जिसने शुद्धिका उपाय नहि कीता सो चारहजार कृच्छ्र व्रत करकें शुद्ध होताहै । ४ । इसमें ऐसा अर्थहै कि जिसका लिया हुया तुलादान थोडे मुल्लकाहोवे तां ४०००० हजार स्वर्ण कृच्छ्र किसतरह करेगा तो ऐसा करणा चाहिए कि लक्षसे अधिक जिसने तुलादान लियाहोवे उसको इतना प्रायश्चित्तहै और थोडे दान वालेकों लयेहोए दानके चौथे हिस्सें अनुसार करणा चाहिए ऐसें आगेभी जानणा

ब्रेति, जो पुरुष ब्रह्मांड कुंभकों ग्रहणकर्त्ताहै और तिसकी शुद्धिनिमित्त प्रायश्चित्तनें रहितहै सो त्रय ३००० हजार कृच्छ्रव्रत करे तां पूर्वकीन्यांई शुद्धिकों प्राप्तहोताहै ॥ ५ ॥ और कल्पवृक्षके दानकों ग्रहण करे तिस दोषकी शुद्धिकों न करे तां पंजा५०००० हजार स्वर्ण कृच्छ्र व्रतांकर्के शुद्धहोताहै ॥ ६ ॥ और सुवर्णकी धेनुके दानकों जो ग्रहणकर्त्ता है और शास्त्रकी विधिकर्के जिसनें अपणी शुद्धि नाहि कीती सोभी पंजा हजार कृच्छ्र व्रतां कर्के पूर्वकीन्यांई शुद्ध होताहै ७ ॥ और सुवर्णके अश्व दानकों जो ग्रहण कर्त्ताहै और पूर्व नहि कीती शुद्धिजिसनें सो पंज सउ५०० सुवर्णकृच्छ्रव्रतकर्के पूर्वकीन्यांई शुद्धहोताहै ॥ ८ ॥ और सुवर्णके घोडेकर्के युक्त जो रथतिसनूं ग्रहणकर्त्ताहै और रथके ग्रहणकरणेंसे अशुद्ध जो पुरुषहै सो छे सउ ६०० सुवर्ण

ब्रह्मांडकुंभसंधातातन्निष्कृतिपराङ्मुखः त्रिसहस्त्रंचरेत्कृच्छ्रंशुद्धिमाप्नोति पौर्विकीम् ॥ ५ ॥ कल्पवृक्षस्यसंधानेत्यजन्तंनिष्कृतिंपुरा पंचायुतै श्वकृच्छ्रैश्चसुवर्णाख्यैर्विशुध्यति ॥ ६ ॥ हिरण्यधेनुसंधाताशास्त्रैरकृतनि ष्कृतिः पंचायुतैश्चकृच्छ्रैश्चशुद्धिमाप्नोतिपौर्विकीम् ॥ ७ ॥ हिरण्याश्वस्य संग्राहीपुरात्वकृतशुद्धिमान् पंचशतैःस्वर्णकृच्छ्रैःशुद्धिमाप्नोतिपूर्ववत् ८ ॥ हिरण्याश्वरथीराजन्नशुचीरथसंग्रहात् षट्शतैःस्वर्णकृच्छ्रैश्च शुद्धोभवतिपू र्ववत् ॥ ९ ॥ हेमहस्तिरथंविप्रःप्रतिगृह्यधनातुरः अकृत्वानिष्कृतिंशा स्त्रमार्गेणाज्ञानपूरितः ॥ १० ॥ षट्शतैर्हेमकृच्छ्रैश्चशुद्धिमानुभयोर्द्विजः पंचलांगलसंग्राहीह्यकृत्वाधर्मनिष्कृतिम् ॥ ११ ॥ अयुतैस्स्वर्णकृच्छ्रैश्चशु द्धोभवतिपूर्वजः अन्यथानिष्कृतिर्नास्तिब्रह्मराक्षसशंकयेति ॥ १२ ॥

कृच्छ्र व्रतकर्के पूर्वकीन्यांई शुद्धहोताहै ॥ ९ ॥ और सुवर्णके हाथी और रथनूं ग्रहणकर्के और शास्त्रके द्वारा तिसकी शुद्धिकों न कर्के धनके ग्रहण करण विषे युक्तहै अज्ञान कर्के पूरित होया २ दोषकर्के युक्त सो ब्राह्मण ॥ १० ॥ छे सउ ६०० स्वर्ण कृच्छ्रव्रत कर्के दोनोंदोषोंसें रहित होताहै अथवा सुवर्ण के हाथिआं कर्के युक्त सुवर्णका जो रथ है तिसको ग्रहण कर्के ऐसा अर्थ करणा और (उभयोः) क्या इस लोक विषे और परलोक विषे शुद्ध होताहै ॥ और पंचलांगल दानकों जो ग्रहणकर्त्ताहै और तिसकी शुद्धिकों नाहि कर्त्ता ११ ॥ सो दश हजार १०००० स्वर्ण कृच्छ्र कर्के ब्राह्मण शुद्ध होताहै ब्राह्मणकी शुद्धि अन्यथा नाहि कही एह ब्रह्मराक्षसगतिकेदेणेवाले प्रति ग्रह हैं ॥ १२ ॥

● अथेति इसतें अनंतर अघमर्षण कृच्छ्रव्रतमाधवनें कहाहै तिसविषे विष्णुजीका वाक्यहै अघ कृच्छ्र व्रतहैं त्रय३दिन उपवास करे और दिन दिन विषे त्रय३काल स्नान करे और जल विषे डुब्बी लाके त्रयवार अघमर्षण मंत्रका उच्चारण करे ॥ और दिन विषे खलोवे रात्रि विषे स्थित होवे और कर्मके अंतविषे दुग्ध देण वाली गौका दान करे एह अघमर्षण कृच्छ्रहै ॥ अब श्री शंखऋषि औगहि प्रकारकर्के अघमर्षणकृच्छ्रनूं कहताहै त्र्यहमिति त्रयदिन त्रयकाल स्नानकों कर्के मुनि मनकर्के जलविषे त्रयवार अघमर्षणमंत्रकोंजपे और त्रयदिन कुछ न भक्षण करे एह अघ

※ अथाऽघमर्षणकृच्छ्रं माधवेनोक्तम् ॥ तत्रविष्णुः ॥ अघकृच्छ्राणिभवन्ति त्र्यहंनाश्नीयात् प्रत्यहंचत्रिषवणंस्नानमाचरेत् जलेमग्नस्त्रिरघमर्षणं जपेत् दिवातिष्ठेद्रात्रावासीत कर्मणोन्ते पयस्विनींगांदद्यादित्यघमर्षणम् शंखस्तु ॥ प्रकारान्तरेणाघमर्षणकृच्छ्रमाह ॥ त्र्यहंत्रिषवणस्नायीमुनिस्स्नात्वाघमर्षणम् मनसात्रिःपठेदप्सुनभुंजीतदिनत्रयम् अघमर्षणमित्येद्व्रतंसर्वाघसूदनमिति ॥ १ ※ अथयज्ञकृच्छ्रः । तत्रांगिराः ॥ युक्तस्त्रिषवणस्नायीसंयतोमौनमास्थितः प्रातःस्नानसमारंभंकुर्य्याज्जप्यंचनित्यशः ।१। सावित्रींव्याहृतिंचैवजपेदष्टसहस्रकम् ओंकारमादितःकृत्वारूपेरूपेतथांततः ।२। भूमौवीरासनेयुक्तःकुर्याज्जप्यंसुसंयतः आसीनश्चस्थितोवापि पिबेद्गव्यंपयःसकृत् ॥ ३ ॥

मर्षण कृच्छ्र संपूर्ण पापांके नाश करणे वाला कहाहै ॥ १ ॥ ❀ इसतें अनंतर यज्ञकृच्छ्रहै तिसविषे अंगिराऋषिकावचनहै युक्तइति मौन विषे स्थित होके इंद्रियांकोंरोकके विषयांतें निवृत्त होवे त्रय दिन त्रय काल स्नान करे और प्रातःकाल विषे स्नानके समय प्रतिदिन जलविषे अघमर्षणकों जपे । १ । और ओंकारका आदविषे उच्चारण कर्के सहित व्याहृतियांके गायत्रीका अष्ठ ८००० हजार जप करे २ पृथ्वी विषे वीरासन विषे स्थित होके और इंद्रियांको रोककर जपकरे वैठकर्के वा उठ कर्के और गौके दुग्धका एकवार पान करे ॥ ३ ॥

गेति दुग्धप्राप्तनहोवे तो गौंका दधिपानकरे और दधिकेअभावविषे छाहपीवे और छाहकेअभाव विषे यवांकेकाडेकोंपीवे ४ ॥ इनांविषे जौ२ प्राप्तहोवे तिसकापानकरे यवांकापान गोमूत्रककें युक्तकरे ॥ ५ ॥ अंगिराजीनें एकदिनकेकृच्छ्रककें संपूर्णपापांके नाशकरणेवालायज्ञनामककें अत बहुतश्रेष्ठकहाहै ॥ ६ ॥ एह यज्ञकृच्छ्रव्रत जो पुरुष पातककर्के युक्तहैं और उपपातकांकर्के युक्त और महापापां कर्के युक्त हैं तिनांके शुद्धकरणे वालाहै ॥ ७ ● अब देवकृत कृच्छ्रव्रतनूं यमक हताहै यति छे ६ गुणा अधिक जल कर्के पके जो यव तिनांकों और शाककों और दुग्धको और दधिकों और घृतकों त्रय त्रय दिनभक्षणकरे और तिसतें परे त्रयदिन वायु भक्षणकरे १ ॥

गव्यस्यपयसोऽलाभेगव्यमेवभवेद्दधि दध्नोभावेभवेत्तक्रंतक्राभावेतुयाव कम् ॥ ४ ॥ एषामन्यतमंयद्यदुपपद्येतततत्पिबेत् गोमूत्रेणसमायुक्तंयावकं चोपयोजयेत् ५ ॥ एकाह्निनतुकृच्छ्रेणउक्तस्त्वांगिरसास्वयम् सर्वपापहरो दिव्योनाम्नायज्ञइतिस्मृतः॥ ६ ॥ एतत्पातकयुक्तानांतथाचाप्युपपातकैः महद्भिश्चापियुक्तानांप्रायश्चित्तमिदंशुभमिति ॥ ७● देवकृतकृच्छ्रंदर्शयति यमः॥ यवागूयावकंशाकंक्षीरंदधिघृतंतथा त्र्यहंत्र्यहंतुप्राश्नीयाद्वायुभक्ष्यः परंत्र्यहम् १ ॥ कृच्छ्रंदेवकृतंनामसर्वकल्मषनाशनम् मरुद्भिर्वसुभीरुद्रैरा दित्यैश्चरितंव्रतम् व्रतस्यास्यप्रभावेनविरजस्काहितेभवन्निति २ ●अथ प्रसृतयावकम् ॥ तत्रहारीतः ॥ अयमात्मकृतैःकर्मकृतैर्गुरुमात्मानंपश्ये त् आत्मार्थं प्रसृतयावकंश्रपयेत् ॥

एह देवकृत नामककें कृच्छ्र व्रत संपूर्ण पापांके नाशकरणे वालाकहाहै मरुत्देवता और वसुदे वता और रूद्र और आदित्य इनांनें पिच्छे एह व्रत करीदा भया सो इस व्रतके करणे कर्के शुद्धहोतेभये ॥ २ ● अथेति अब प्रसृतयावक व्रत अर्थात् एकहाथके परमाणके अन्न खा णका व्रत कहाहै तिसविषे हारीत ऋषिकावचन है अयमिति एह व्रत करणे वाला पुरुष ब्राह्मणां कर्के कहा जो कर्म तिनांकों आपकरे और तिनां आपकीते होये कर्मां कर्के अपणे आपकों गुरु क्या पूज्यदेखे अर्थात् शुद्धदेखे और अपणे व्रतवास्ते एकमुष्टिप्रमाणयव पकावै

श्रीर तिसतें अनंतर हवन करे श्रीर तिसीकर्के वैश्व देव बलिकरे श्रीर पके होये यवों कों अभिमंत्रण करे वक्ष्यमाण मंत्रों कर्के पूर्वोंकाहि अर्थ स्पष्टकर्के किहाहै अयमिति यवोसि इत्यादि हेयव तूंयवहैं क्या पापांके नाश करणें वालाहैं श्रीर अन्नांका राजा हैं वरुण तुजका देवताहै मधुकर्के युक्त होया २ संपूर्ण पापांके दूर करणें वालाहैं श्रीर संपूर्ण ऋषियांकर्कें तूं पवित्र कहाहे ॥१॥ घृतमिति हेयवातुसीं घृतहो श्रीर तुसींहि मधुहो श्रीर आपोहिष्ठा क्या परमशुद्धकरणे वाले हो श्रीर अमृत हो मेरेसंपूर्ण पापकों दूरकरो जो मेनें दुष्कृतकीयाहै ॥ २ ॥ श्रीर वाणी श्रीर कर्म श्रीर मनकर्के दुर्विचितन कीयाहै श्रीर अलक्ष्मीकों श्रीर काल

ततोऽग्नौजुहुयात् तदेववलिकर्मशृतंवाभिमंत्रयेत् (अयंपुरुषः आत्मकृतैःस्वयंसंपादितैः कर्मकृतैः कर्मणा प्रयोजकद्वारा कृतैः कर्मभिरितिशेषः आत्मानंगुरुंपूज्यंपश्येदित्यर्थः) यवोसिधान्यराजोवावारुणोमधुसंयुतः ॥ निर्नोदःसर्वपापानांपवित्रमृषिभिःस्मृतम् ॥ १ ॥ घृतंयवामधुयवाआपोहिष्ठामृतंयवाः सर्वपुनंतुमेपापंयन्मयादुष्कृतंकृतम् ॥ २ ॥ वाचाकृतंकर्म्मकृतंमनसादुर्विचिंतितम् अलक्ष्मींकालकर्णींच सर्वंपुनीतमेयवाः ॥ ३ ॥ मातापित्रोरशुश्रूषांयौवनेकारितंतथा श्वशूकरावलीढंच उच्छिष्टोपहतंचयत् ॥ ४ ॥ सुवर्णस्तेयंव्रात्यत्वंवालत्वादात्मजंतथा ब्राह्मणानांपरीवादंसर्वंपुनीतमेयवाः ॥ ५ ॥ वक्ष्यमाणां रक्षां कुर्यात् ॥

कर्णीकों जो मृत्युदाराक्षसीहै इससंपूर्णांको यवपवित्र करे ॥ ३ ॥ श्रीर मातापिताकी अशुश्रूषा रूपपाप श्रीर युवावस्थाकर्के जो व्यभिचारादिरूप पाप श्रीर कुत्ते कर्के श्रीर शूकर कर्के जो उच्छिष्ट भक्षण का पाप श्रीर उच्छिष्ट कर्के युक्त के भक्षण का जो पाप ४ ॥ श्रीर सुवर्णस्तेयकापाप श्रीर संस्काररहित होणेका जो पाप श्रीर बाल्यावस्थाकर्के श्रीर ब्राह्मणकी निंदा कर्के उत्पन्न जो पाप तिनां संपूर्णां कों दूरकरो ॥ ५ ॥ श्रीर आगे कथन करणी जो रक्षा तिसकों करे

नमोरुद्राय इत्यादि मंत्रांकर्के पात्रविषें स्थापनकरे ॥ और यदेवा इत्यादि मंत्रांकर्के अपणे विषें हवनकरे क्या पानकरे अन्य पुरुषांके अर्थवास्ते त्रय रात्रा पीवे और जिसने पाप कीता है सो छे६ रात्र पीवे तो शुद्ध होताहै और महापापी सतरात्रपर्यंतपीवे और बारा१२रात्रपर्यंत पीपेकर्के संपूर्ण पापसूं शुद्ध होताहै ॥ और गोमयसें क्या गोहेतें निकाले जो यव हैं तिन्हांको इकी दिन पर्यंत पीवे कर्के गणांको देखताहै और गणाधिपतिका दर्शन करताहै और विद्याकों देखताहै और विद्याके पतिकों देखताहै और स्मृति कहतेहैं पूर्णायामिति जो पुरुष गोमूत्र विषे पकेहोये यवांकों वा गोमूत्र और गोमय और दधि और दुग्ध और घृतइनांकों पान कर्ताहै सो

नमोरुद्रायभूताधिपतयेद्यौःसावित्रीमानस्तोकेति पात्रेनिषिच्ययद्देवानमो यातामनोजवाः सुदक्षोदहंपितरस्तेनःपांतुतेनोवंतुतेभ्योनमस्तेभ्यः स्वाहे त्यात्मनिजुहुयात् । त्रिरात्रमेवार्थीपापकृत् षड्रात्रंपीत्वापूतोभवतिसप्तरात्रं महापातकीद्वादशरात्रंपीत्वासर्वंम्पुरुषकृतंपापंनिर्दहति निःसृतानांयवाना मेकविंशतिरात्रंपीत्वागणान्पश्यति गणाधिपतिंपश्यति विद्यांपश्यतिवि द्याधिपतिंपश्यति । पूर्णायांयावकंपक्कंगोमूत्रंवासकृद्दधिक्षीरंसर्पिःप्रगेभु क्त्वामुच्यतेसोंहसःक्षणादित्याह भगवान् मैत्रावरुणिरिति । अर्थीलौकि ककार्य्यसाधकःत्रिरात्रमेवपिवेत् ॥ पापकृत्षड्रात्रमितिसंवन्धः ॥ ॥ अथब्रह्मकूर्चव्रतमाहजावालः ॥ अहोरात्रोषितोभूत्वापौर्णमास्यांविशेष तः ॥ पंचगव्यंपिवेत्प्रातर्ब्रह्मकूर्चविधिःस्मृतः ॥ १ ॥ यथाह पराशरः ॥ गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् ॥ निर्दिष्टंपंचगव्यंतुप्रत्येकंकाय शोधनम् । १

क्षणसें हिपापतें रहित होताहे ऐसें भगवान् मैत्रावरुणि कहते भये एह अर्थ स्पष्ट कर्के किहाहे अर्थीति लौकिककार्य्य करणे वालेकानाम अर्थीहै ॥ ० ॥ इसतें अनंतर ब्रह्मकूर्च व्रतकों जाबालऋषि कहताहै एक दिन रात्र उपवास करे चाहे किसे दिनहोवे परंतु पूर्णमासी विषें विशेष कर्के कहाहै प्रातःकाल विषें पंचगव्य पानकरे एहब्रह्म कूर्चकी विधि कहीहै १ ॥ जैसें पराशर कहता भया गोविति गोमूत्र और गोमय और दुग्ध और दधि और घृत कुशोदक एह पंच गव्य कहाहै एक एकगोमूत्र आदि देहके शुद्धकरणे वाले कहेहैं ॥ १ ॥

इसमें विशेष कहतेहैं गविति तांबे की न्याईं है वर्ण जिसका ऐसी गौका गोमूत्र ग्रहण करे और श्वेत वर्ण वाली गौका गोमय ग्रहण करे और सुवर्ण की न्याईं वर्णवाली गौका दुग्ध और नीलवर्ण गौका दधि ॥ २ ॥ और कृष्णवर्ण गौका घृत जेकर पूर्वोक्त रंगा वालियां गौयां न प्राप्तहोवें तां कपिलागौका हि संपूर्ण ग्रहण करे पंचगव्यविषे एहविधिहै ॥ ३ ॥ अब पंचगव्यका परिमाणहै गविति गोहेतें दूणा गोमूत्र और चारगुणा घृत और अठगुणा दुग्ध और तैसे अठगुणा दधि पंचगव्यविषे एहपरिमाणहै ॥ ४ ॥ इत्यं जगा एह प्राचीनोंका मत किहाहै ॥ अब नवीनोंका मत दिखाईदा है गविति गोमूत्र

गोमूत्रंताम्रवर्णायाः श्वेतायाश्चापिगोमयम् पयःकांचनवर्णायानीला याश्चतथादधि ॥ २ ॥ घृतंचकृष्णवर्णायाःसर्वंकापिलमेववा अला भेसर्ववर्णानांपंचगव्येष्वयंविधिः ॥ ३ ॥ पंचगव्यपरिमाणंतु ॥ गो शकृद्द्विगुणंमूत्रंघृतंविद्याच्चतुर्गुणम् क्षीरमष्टगुणंप्रोक्तंपंचगव्येतथादधि ॥ ४ ॥ तथाष्टगुणमितिप्रांचः ॥ गोमूत्रमाषकास्त्वष्टौगोमयस्यतुषोडश क्षीरस्यद्वादशप्रोक्तादध्नस्तुदशकीर्तिताः ॥ ५ ॥ गोमूत्रवद्घृतस्याष्टौतद र्द्धंतुकुशोदकम् अर्वाचीनैश्चऋषिभिःपरिमाणमुदाहृतम् ॥ ६ ॥ गायत्र्यादायगोमूत्रंगन्धद्वारेतिगोमयम् आप्यायस्वेतिचक्षीरंदधिक्रा व्णेतिवैदधि ॥ ७ ॥

विषे अठ ८ मासे परिमाण और गोहा सोलां मापपरिमाण और दुग्धबारां १२ मासे परिमाण और दधिदश १० मासेपरिमाण ॥ ५ ॥ और गोमूत्रकी न्याईं घृतका भी अठ ८ मासे परि माण और तिसतें अद्धकथा चार४मासे कुशाका जल इहां मापकहणं करके मासयांका ग्रहणहै ॥ ६ ॥ अब इनके मंत्रोंको कहते हैं गायेति गायत्री मंत्र करके गोमूत्रको ग्रहणकरे और गंध द्वारा इस मंत्र करके गोमयको ग्रहणकरे और आप्यायस्व इस मंत्र करके दुग्धको ग्रहण करे और दधि क्राव्णा इस मंत्रकरके दधिको ग्रहण करे ७ ॥

तदेषो और तेजोसिशुक्र इस मंत्र करके घृतको ग्रहण करे और देवस्यत्वा इस मंत्र करके कुशाके जलकू ग्रहण करे इस रीतिसें ऋचा करके पवित्र जो पंचगव्य है तिसको अग्नि विषे हवन करे ॥ ८ ॥ सातहैं पत्र जिनांके और नहि छेदया है अग्र जिनां का और तोतेकी न्याईहैं वर्ण जिनांका ऐसीयां कुशा करके जैसे विधिहै तैसे पंचगव्यका हवन करे ॥ ९ ॥ और इरावती इदं विष्णु मानस्तोकेतिशंवती एनां चार ऋचा करके हवनकरणे योग्यहै और हवनकेशेषकू पिच्छों ब्राह्मण पीवे ॥ १० ॥ और ॐकारकरके पंचगव्यविषे अंगुष्ट और अनामिकाकों फेरे और ॐकारकों पढकर्के शुद्धकरे और ॐकार मंत्र के उच्चारण करके

तेजोसिशुक्रमित्याज्यंदेवस्यत्वाकुशोदकम् पंचगव्यमृचापूतंहोमयेदग्नि सन्निधौ ॥ ८ ॥ सप्तपत्राश्चयेदर्भाअच्छिन्नाग्राःशुकत्विषः एतैरुद्धृत्यहोतव्यंपंचगव्यंयथाविधि ॥ ९ ॥ इरावतीइदंविष्णुर्मानस्तोकेतिशंवती एताभिश्चैवहोतव्यंहुतशेषंपिबेद्द्विजः ॥ १० ॥ प्रणवेनसमालोड्यप्रणवेनाभिमंत्र्यच प्रणवेनसमुद्धृत्यपिबेत्तत्प्रणवेनतु ॥ ११ ॥ मध्यमेनपलाशस्यपद्मपत्रेणवापिबेत् स्वर्णपात्रेणताम्रेणब्रह्मतीर्थेनवापुनः ॥ १२ ॥ यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमामकम् ब्रह्मकूर्चोपवासस्तुदहत्यग्निरिवेन्धनमिति ॥ १३ ॥ इदंपंचगव्यपरिमाणाविहितायतृतीयप्रकरणयोरुक्तमपिप्रसंगादत्राप्युक्तमिति न पौनरुक्त्यम्

अंगुष्ट और तर्जनीके साथ त्रयवार उद्धरणागे क्या उपरले पासे सुद्ध और ॐकार करके पीवे ११ ॥ पलाशके मध्यम पत्रकर्के वा कमलपत्रकर्के वा सुवर्णके पात्रकर्के अथवा तांबके पात्र कर्के वा ब्रह्मतीर्थ कर्के पंचगव्यकों पीवे ॥ १२ ॥ अब प्रार्थनाकरतेहैं यदिति जो पाप मेरेत्वा अस्थियांविषे स्थितहै और देहविषे स्थितहै तिसको यह ब्रह्म कूर्च उपवास व्रत दाह करे जैसे अग्नि काष्टकों दाहकर्ताहै १३ ॥ एह पंचगव्य परिमाणदूसरे तीसरे प्रकरणविषे कहाहोयाभीथा तथापि इस स्थान प्रसंगतें कहाहै पुनरुक्ति दोष नहि जानणा ॥

यदेति जद फेर एह पंचगव्य मिल्या होया त्रय रात्रां विषे पींवें तां तिस ऋषिनें व्रत का नाम यतिसांतपन कहाहै इस शंख जीके स्मरणतेंहे ॥ जाबालनेतो फेर सप्त ७ दिनांका सांतपन व्रत कहा है गवितिं गोमूत्र और गोमय और दुग्ध और दधि और घृत और कुशोदक इनांमेसें दिन दिन विषे क्रम कर्कें एक एकका पान कर्कें दिन रात्रउपवास करे तां इसका नाम कृच्छ्र सांतपन कहाहै एह संपूर्ण पापांके नाश करणे वालाहै ॥ १ ॥ इनां गुरु लघुकृच्छ्र व्रतोंकी व्यवस्था सामर्थ्यकों देखके जानणे योग्यहै । ऐसे आगेभी व्यवस्था

यदा त्वेतदेवपंचगव्यमिश्रितंत्रिरात्रमभ्यस्यते तदा यतिसांतपनसंज्ञां ल भते एतदेवत्र्यहाभ्यस्तंयतिसांतपनंस्मृतमिति शंखस्मरणात् ॥ जावाले नतु सप्ताहसाध्यंसांतपनमुक्तम् गोमूत्रगोमयंक्षीरंदधिसर्पिःकुशोदकम् एकैकंप्रत्यहंपीत्वात्वहोरात्रमभोजनम् कृच्छ्रंसांतपनंनामसर्वपापप्रणाश नमिति १ ॥ एषांच गुरुलघुकृच्छ्राणां शक्त्याद्यपेक्षया व्यवस्था विज्ञेया एवमुत्तरत्रापिव्यवस्थावोद्धव्येति ॥ ❀ अथचांद्रायणं वक्तुंतावत्तस्यकार्य्य विशेषोपयोगिता प्रदर्श्यते तत्र याज्ञवल्क्यः ॥ अनादिष्टेषुपापेषुशुद्धिश्चां द्रायणेनतु धर्मार्थंयश्चरेदेतच्चन्द्रस्यैतिसलोकतामिति ॥ १ ॥ तथाचषट् त्रिंशन्मतेऽभिहितम् यानिकानिचपापानिगुरोर्गुरुतराणिच कृच्छ्राति कृच्छ्रचांद्रैस्तुशोध्यन्तेमनुरब्रवीदिति ॥ १ ॥

जानणे योग्यहै ❀ इसतें अनंतर चांद्रायणव्रतकथन करणे तां आदविषे तिस चांद्रायणके कार्य विषें उपयोगिता दखाईदीहै तिस विषे याज्ञवल्क्यजीका वचन हे अनेति अनादिष्ट पापांके होयां २ चांद्रायण व्रत कर्कें शुद्धि कहीहै जो धर्मके वास्ते चांद्रायणकों करताहै सो चंद्रमाके लोककों प्राप्त होताहै ॥ १ ॥ तिसें षट् त्रिंशन्मत विषे कहाहै येति जो कुछक पापहैं वडे तों वडे सों कृच्छ्र और चांद्रायण व्रत कर्कें शुद्ध होतेहैं एह मनुजी कहते भये ॥ १ ॥

संक्रमोजलोपरिगमनार्थंकाष्ठशिलादिरूपःध्वजश्चिह्नंराजद्वारादौ यष्टिः पुष्करिण्यादौ प्रतिमाश्च क्षुद्रामृण्मय्यादयः एतद्भेदकःपुनर्नवंकुर्य्यात् पणानांपंचशतानिचदद्यात् ॥ अत्रच प्रतिमातारतम्येन तद्भेदतारतम्येन दंडप्रायश्चित्तयोर्व्यवस्था ॥ दारिद्र्यादिना भर्तुरतिक्रमे आपस्तंवः भर्तुरतिक्रमेकृच्छ्रइति ॥ अतिक्रमोदारिद्र्यक्रोधमात्सर्य्यादिनाऽवमाननम् पर्वणिमैथुनेविष्णुपुराणे।चतुर्दश्यष्टमीचैवअमावास्याथपूर्णिमा पर्वाण्येतानिराजेन्द्ररवेः संक्रांतिरेवच १ स्त्रीतैलमांससंभोगीपर्वस्वेतेषुयोनरः विण्मूत्रभोजनंनामप्रयातिनरकंमृतः २ अस्यप्रतिप्रसवः ॥ शनिषष्ठ्यांस्मृतं तैलंमहाष्टम्यांपलाशनम् तीर्थेक्षौरंचतुर्दश्यांदीपावल्यांचमैथुनम् ॥ १ ॥ महाष्टमी आश्विनशुक्लाष्टमी ॥

स्या ३ और पूर्णमासी ४ और सूर्यकी संक्रांति ५ एह पंच पर्वहैं ॥ १ ॥ इनोंके विषय जो पुरुष स्त्री और तेल और मांस इनानूं भोगताहै सो मरकरके विष्टा और मूत्रहैं भोजन जिसके विषय ऐसे नरकको प्राप्त होताहैं ॥ २ ॥ इसका भिन्न भिन्न दोष निवारणकहतेहैं शनीति ॥ शनिवार षष्ठीके विषय तेल मले अर आश्विनके शुक्ल पक्षकी अष्टमीके विषय मांस भक्षणकरे अर तीर्थके विषय चतुर्दशीके दिन क्षौर कराए अर दिवालीके विषय मैथुन करे तोभी इसी नरकको प्राप्तहोताहै ॥ १ ॥

और किसे स्मृतिकाभी वाक्य है अष्टेति अष्टमी ८ और चतुर्दशी १४ और दिन और पर्व इनके विषय मैथुन कों करके सहित वस्त्रांके स्नान नूं करके पश्चात् वरुण है देवता जिनां का तिनां मंत्रों करके मार्जन करे ॥ १ ॥ उलटीके विषय शातातप जीका वाक्य है विच्छेति ब्राह्मण और क्षत्री और वैश्य इनकी उलटीके विषय और भन्ने होए पात्रक विषय भोजन करणेके विषय पंच गव्य करके शुद्धि होतीहै ॥ १ ॥ मांसादिके वमनके विषय यमजी विशेष कहतेहैं ॥ मसूरेति जो ब्राह्मण अर क्षत्री अथवा वैश्य मसर और मांह और मांसको भक्षण करके उलटी करताहै तिसकों तीन ३ रात्र उपवास प्रायश्चित्त करणा लिखाहै अर स्नान करके अर तीन ३ प्राणायामों करके अर घृतका भक्षण करके शुद्ध होताहै ॥ १ ॥ यज्ञोपवीतादियोंके नाशके विषय भी यम

स्मृत्यंतरे अष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथुनम् कृत्वासचैलंस्नात्वाचवारुणी भिश्चमार्जयेदिति १ वारुणीभिर्वरुणदेवताकैर्ऋग्भिरित्यर्थः।वमनेशातातपः विच्छर्दनेद्विजातीनांभिन्नभांडेचभोजने पंचगव्येनशुद्धिःस्यादितिशातातपो ऽब्रवीत् १ मांसादिवमनेतुविशेषमाह यमः॥ मसूरमाषमांसानिभुक्त्वावावम तिद्विजः त्रिरात्रमुपवासोऽस्यप्रायश्चित्तंविधीयतेप्राणायामैस्त्रिभिः स्नात्वा घृतंप्राश्यविशुद्ध्यति १ यज्ञोपवीतादिनाशेपि सएव मेखलादंडाजिनयज्ञोप वीतावपातेषु मनोव्रतवतीभिःसप्तआज्याहुतीर्जुहुयात्पुनर्यथार्थंप्रतीयात् असकृद्भैक्ष्यभोजनेऽभ्युदितेऽभिनिर्मुक्तेवांतेदिवास्वप्नेनग्नस्त्रीदर्शनेनग्नस्वापे श्मशानमाक्रम्यहयादींश्चारुह्यपूज्यातिक्रमेचैताभिरेवजुहुयादग्निसमिंधने

जीनेहि प्रायश्चित्त लिखाहे ॥ मेखेति तडागी और दंड और चर्म और यज्ञोपवीत इनके नाशके विषय मनोव्रतवती इत्यादि मंत्रों करके घृतकीआं सप्त ७ आहुतीआं करके पश्चात् मेखलादिकों धारणाकरे अर अनेकवार भिक्षाकों भोजन करणा और जिसके सुतिआं होआं सूर्य उदय होताहै अर जिसके सुतिआं होआं अस्त होताहै उलटी होणी और दिनके विषय सौना और नग्नस्त्रीकों देखणा और नग्न सौणा और श्मशान भूमिके विचों लंघना और घोडे आदिकोंके उपर चडकर और महात्माकों उलंघन करणा अर्थात् तिनकी आज्ञाकों नहि मन्नणा अथवा विना नमस्कारके चलेजाणा इन संपूर्णोंके विषयमें बलदी अग्निके विषय मनोव्रतवती इत्यादि सप्त मंत्रों करके आहुतीआं करे॥ ॥

स्थेति वृक्षादि और माहिष्यादिकी हिंसाकरणेकेविषें (यद्देवादेवहेडनं) इत्यादि जो कूष्मांड संज्ञिकमंत्रहैं इनोंकरके घृतका होमकरे ॥ मणि और वस्त्र और गौ और स्वर्ण इत्यादियोंका दानलेकरके गायत्रीका अठ हजार ८००० जपकरे इति ॥ अर्थः (मनोजूतिर्जुषतां) इत्यादि मंत्रों करके अर (त्वमग्नेव्रतपाअसि) इत्यादिमंत्रोंकरके होमकरे अर यथार्थक्या उपनयन विधि करके सहितमंत्रांके यज्ञोपवीतका ग्रहणकरे ॥ अभ्युदितादिके स्वरूप नूं यमजी कथन करतेहैं ॥ सूर्य्येति जो पुरुष सूर्यके उदयहोआं होआं सुत्तारहिताहे तिसको अभ्युदित कहतेहैं अर जोपुरुष सूर्यके अस्त होआं होआं सुत्ता रहिताहै तिसको निर्मुक्त कहतेहैं ॥ १ ॥ अभ्युदितके विषय प्रायश्चित्त नूं भी यमजी कहतेहैं ॥ अजीति अन्नका नपचना और अभ्यु

स्थावरसरीसृपादीनांवधे यद्देवादेवहेडनमितिकूष्मांडीभिस्त्रिरात्रमाज्यंजुहुयान्मणिवासोगवादीनांचप्रतिग्रहे गायत्र्यष्टसहस्त्रंजपेदिति मनोजूतिर्जुषतामितिमनोलिंगाभिः त्वमग्नेव्रतपाअसीतिव्रतलिंगाभिश्च यथार्थमुपनयनोक्तेनविधिनासमंत्रकं प्रतीयाद्गृह्णीयात् । अभ्युदितादिस्वरूपमाहयमः। सूर्योदयेतुयश्शेते ससूर्योदितउच्यते अस्तंगतेतुयःशेतेसूर्येनिर्मुक्त एवसः १ अभ्युदितेप्रायश्चित्तमाहसएव अजीर्णेऽभ्युदिते वांतिश्मश्रुकर्मणि मैथुनेदुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयते ॥ २ ॥ अत्रैवकामतोगौतमः सूर्याभ्युदितेब्रह्मचारीतिष्ठदहन्यभुंजानोऽस्तमितेरात्रौसावित्रींजपेत् । अभ्यासेत्वावृत्तिरूह्या । गर्भाधानादिसंस्कारातिपत्तौतु आश्वलायनः। आरभ्याधानमाचौलात्कालातीतेतुकर्मणाम् व्याहृत्याज्यंसुसंस्कृत्यहुत्वाकर्म यथाक्रमम् ॥ १ ॥ एतेष्वेकैकलोपेपि पादकृच्छ्रंसमाचरेत् ॥

दित और उद्वमन और थोडा क्षौर कर्म और मैथुनकरणा और खोटास्वप्न और दुष्ट पुरुषके साथ स्पर्शकरणा इनकेविषयस्नानहि विधानकीताहै ॥ २ ॥ इसकेविषयहि कामनाकेविषयमें गौत्तमजी कावाक्यहै सूर्य्येति अभ्युदितके विषय दिनके विषय अन्नकों न भक्षण करदाहोआ अष्टांगमैथुनतेंरहितहोकर स्थितहोवे सूर्यकेअस्तहोआंहोआं रात्रिके विषय गायत्री नूं जपे इसोंके अभ्यास केविषयमें एहीप्रायश्चित्त दोवारकरे इति ॥ गर्भाधानादिसंस्कारके नाशके विषय आश्वलायनजीका वाक्यहै आरेति गर्भाधान कर्मतें लेकर चौलकर्म पर्यंत कर्मांका कथनकीता जो काल है तिसके वीतिआंहोआं व्याहृतीआं करके हछी तरां संस्कारकों करके क्रमसें घृत करके होमनूं करे १ इनकर्मोंके मध्यमे एककर्मकेभी नाश होआं होआं एक पाद कृच्छ्र व्रतको करे ॥

चूडेति चूडा कर्मके नाशके विषय आधा कृच्छ्रव्रतकरे आपदासमय मेंभीएहि करणा अर जब आपदा न होवे अर संस्कार कर्मका नाशहो जावे तब संपूर्णस्थानके विषय दूणा प्रायश्चित्त करे ॥ २ ॥ इसीमें कात्यायन जी भी कहतेहैं ॥ लुप्त इति संस्कार कर्मके नाशके विषय संपूर्णस्थानके विषय प्रायश्चित्त करे अर प्रायश्चित्तके कीतिआंहोआं पीछेसें नाश होए कर्म नूं करे ॥ १ ॥ त्वन्नइति(त्वन्नःसत्वन्न)इनांमंत्रांकरके और तिसप्रकार(इमंमे)इसमंत्रकरके आहुतीआं नूं करे अर(येतेशतमयाश्चाभ्यामुदुत्तमम्रृचा)इत्यादिऋचा करकेहोम नूंकरे २ ॥ हुत्वेति भिन्न भिन्न हवन नूं करे पश्चात् कृच्छ्रव्रत का एकपादकरे अर चौल कर्मकें विषय आधो कृच्छ्रव्रतकरे स्त्रीआंकों भी इसीप्रकार मंत्रांकर्के जातादि कर्म करणा ॥ ३ ॥ गर्भाधान कर्मके न करणे के विषय

चूडाया अर्द्धकृच्छ्रः स्यादापदीत्येवमीरितम् ॥ अनापदितुलुप्तेतुसर्वत्रद्विगुणंचरेत् २ ॥ कात्यायनोपि ॥ लुप्तेकर्मणिसर्वत्रप्रायश्चित्तंविधीयते । प्रायश्चित्तेकृतेपश्चाल्लुप्तंकर्मसमाचरेत् ॥ १ ॥ त्वन्नःसत्वन्नइत्याभ्यां इमंमेतुतथाहुतीः येतेशतमथाश्चाभ्यामुदुत्तमम्रृचाहुतीः ॥२॥ हुत्वापृथक् पृथक्पादमर्द्धंचौलेसमाचरेत् स्त्रीणामप्येवमेवस्याज्जाताद्यामंत्रिकाक्रियेति ॥३॥ गर्भाधानाकरणआश्वलायनः ॥ गर्भाधानस्याकरणेतस्यांजातस्तुदुष्यति अकृत्वागांततोदत्त्वाकुर्यात्पुंसवनंपतिरिति ॥ १ ॥ क्षुतादौवृद्धपराशरः विप्रः क्षुत्कृत्यनिष्ठीव्यकृत्वाचानृतभाषणम् वचनंपतितैःकृत्वादक्षिणंश्रवणं स्पृशेत् प्रेक्षणंशशिनोऽर्कस्यब्रह्मेशहरिसंस्मृतिः ॥१॥ एतच्चजलाभावेकर्मण्याप्तेवा अतएव वृद्धशातातपः ॥

आश्वलायनजी का वाक्यहै । गर्भेति ॥ जिस स्त्रीका गर्भाधानसंस्कार नहि कीआ तिस केविषों उत्पन्न होआ बालक दुष्ट होताहै अर गर्भाधान संस्कार नू नकरके तिसतें उपरंत गोदान करके पश्चात्- भर्त्ता पुंसवन संस्कारकों करे ।१। छिक्यादिकांकेविषय वृद्धपराशरजी का वचनहै विप्रइति छिक और थुक और झूठ वचन और पतितांके साथ वार्त्ताइनां नू-करके ब्राह्मण सज्जे कांन नू हाथ लगावे और चंद्रमा अर सूर्यका दर्शन करे और ब्रह्मा और शिवजी और विष्णु इनका स्मरण करे ।१।एह वार्ता कबकरे जब पासजल नहोवे अथवा किसी काममें लगा होआ होवे ॥ इसी कारणतें वृद्धशातातपनें कहा है ॥ ॥

क्षुत्वेतिछिकमार करके और थूक करके और वस्त्र कों पहिर कर बुद्धिमान् पुरुष आचमन करे अथवाब्राह्मणकों स्पर्श करे अथवा गौकी पिठका दर्शन करे॥१॥यथेति जिस प्रकार एह कथन कीतेहैं तिस प्रकार प्रथमके अभावमें अगले कों ग्रहण करे प्रथमके नाशमें दूसरेकी प्राप्ति इच्छित है अर्थात् जलके अभावमें ब्राह्मण कों स्पर्श करे अर ब्राह्मणके अभावमें गौका दर्शन करे ॥ २ ॥ संवत्सर कर्मके नाशके विषय विष्णु पुराणमें किसे ऋषिनें किसीके प्रति कहाहै । संवेति एक वर्ष पर्य्यंत जिस पुरुष के कर्मका नाश होआहै अर्थात् जिस पुरुषने एक वर्ष नित्य कर्म नहि कीता तिसके दर्शन करणेतें श्रेष्ठ पुरुषानें सर्वदा काल सूर्यका दर्शन करणा योग्यहै॥१॥हे महामते तिसके स्पर्शमें सहित वस्त्रां के स्नान करणा एही

क्षुत्वानिष्ठीव्यवासस्तुपरिधायाचमेद्बुधः कुर्याद्वाब्राह्मणस्पर्शंगोपृष्ठस्यचदर्शनम् ॥ १ ॥ यथाविभवतोह्येतत्पूर्वाभावेततःपरम् अविद्यमानेपूर्वोक्तेउत्तरप्राप्तिरिष्यत इति ॥२ ॥ संवत्सरक्रियातिपाते विष्णुपुराणे ॥ संवत्सरंक्रियाहानिर्यस्यपुंसःप्रजायते तस्यावलोकनात्सूर्य्योनिरीक्ष्यःसाधुभिः सदा ॥ १ ॥ स्पृष्टेस्नानं सचैलंतुशुद्धिहेतुर्महामते पुंसोभवति तस्योक्तानशुद्धिःपापकर्मणइति ॥२॥अत्रच प्रायश्चित्तविशेषाश्रवणादेकाहातिक्रमेचैकाहमभोजनेनतस्योक्तत्वात्तदनुसारेणच षष्ट्यधिकशतत्रयदिनापचारे तावदुपवासकरणाशक्तेस्तत्प्रत्याम्नायत्वेन षडुपवासैरेकैकप्राजापत्यकल्पनयायोज्यम् ॥ निमंत्रणत्यागेतुयमः

शुद्धिका कारणहै अर जिसके दर्शनादितें एह सूर्य्य निरीक्षणादि प्रायश्चित्तहै तिस पापी पुरुषकी शुद्धि नहि कथन कीती ॥ २ ॥ इसके विषयप्रायश्चित्तके वहुत भेदके देखणेतें क्योंकि एक दिन कर्मके न करणेमें एक उपवास तिसकोंकथन कीताहै तिसके अनुसार करके अर्थात् जिस हसाब करके तीन सौ अर साठ ३६० दिन के वीतिआं होआं तिस उपवास करणेके विषय समर्थाके न होणेतें तब तिस प्रायश्चित्तके बदले करके छिआं ६ उपवासां करके एक एक प्राजापत्य व्रत की कल्पना करके जोडने योग्यहै निमंत्रण कों ग्रहण करके तिस के त्यागके विषयें यमजीका वचनहै ॥

केतेति जो ब्राह्मण श्राद्धादिके विमंत्रण कों करवाके अर्थात् भोजनकों मान करके पश्चात् नहि खांदा सो ब्राह्महत्याके पाप कों प्राप्त होताहै अर मर करके शूद्र योनिकों प्राप्त होताहै ॥ १ ॥ इस पापके प्राप्त होश्रां होश्रां ब्रह्मण नियम कों धार करके यति चांद्रायण व्रत कों करके तिस पापतें रहित होताहै ॥ २ ॥ निमंत्रित कीते होए ब्राह्मण कें न बुलाणेमें भी एही प्रायश्चित्त जानना ॥ एह वाक्य कामके अभ्यासमेंहै ॥ झूठे वचनादिकें विषयमें शंख और लिखितका वाक्य है आक्रोशेति तुमने स्वर्ण चुराश्राहै इस मिथ्याका नाम आक्रोश है आक्रोशनश्रौरझूठ कथन करणा इनके विषयमें एक १ रात्र अथवा तीन ३ रात्र उपवास करणा इति अर कामतें अभ्यासकें विषयमें असत्यभाषण

केतनंकारयित्वातुयोनिपातयतिद्विजः ब्रह्महत्यामवाप्नोतिशूद्रयोनौच जायते ॥ १ ॥एतस्मिन्नेनसिप्राप्तेब्राह्मणोनियतव्रतः यतिचांद्रायणंचीर्त्वा ततःपापात्प्रमुच्यते इति २ श्राद्धादौनिमंत्रणंकेतनम् ॥ निमंत्रितस्याऽनाहूवानेप्येतदेव एतच्चकामाभ्यासे ॥ अनृतवचनादौ शंखलिखितौ ॥ आक्रोशनानृतवादे एकरात्रंत्रिरात्रं चोपवास इति ॥ कामतोभ्यासेतु असत्यभाषणं शूद्रसेवनम् इत्यपात्रीकरणंकृत्वा तप्तकृच्छ्रंकृत्वा शुद्ध्यतीति विष्णूक्तंज्ञेयम् ॥ वधफलकेऽनृते तु व्यसनप्रायश्चित्तप्रसंगेनोपपातके षूक्तं द्रष्टव्यम् ॥ व्रणमध्ये कृमिपाते गरुडपुराणे ॥जायंतेयस्यशिरसि कृमयोविनतात्मज कृच्छ्रंतदाचरेत्प्राज्ञःशुद्ध्येकश्यपात्मज इति १ यत्तुच्यवनः ॥ कृमिदर्शने सांतपनम् ॥ वृषभोदक्षिणेति ॥

और शूद्रसेवन इस अपात्री करण संज्ञिकपापकों करके तप्त कृच्छ्र व्रत करके शुद्ध होताहै एह विष्णुजीका कहाहोया वचन जानना हिंसा है फल जिसका ऐसा जो झूठ है तिसके विषय प्रायश्चित्त व्यसन प्रायश्चित्तके प्रसंग करके उपपातकांके मध्यमें कथन कीताहै सो तिस स्थानमें देख लेणा इति जखमके मध्यमे कीटों के पौणेमें गरुड पुराणमें कहा है ॥ जायमिति । हे गुरुड जिस पुरुषके शिरके विषये कीडे उत्पन्न होतेहैं हे कश्यपके पुत्र सो बुद्धिमान् पुरुष शुद्धिके वास्ते कृच्छ्र व्रतकों आचरण करे ॥ १ ॥ जो च्यवनजीनें कहाहै कि कृमिओंके पौणेमें सांतपन व्रत करै और एक बैल दक्षिणा देवे

एह वाक्य जब एकसमयके विषय अनेकों जखमोंके विषय तीक्ष्णकी डेउत्पन्न होवें तिस विषय विषे जानना इसस्थानमे क्षत्री आदिश्रोंकों एह प्रायश्चित्त एक एक पाद न्यूनजानना अर्थात् क्षत्रीकों तीन ३ पाद सांतपन व्रत अर वैश्यकों आधा अर शूद्रकों एकपाद जानना ॥ दिनमें मैथुनादिके विषयमे शंखजीने कहाहै दिवेति दिनके विषय मैथुननूं करके और तिसी प्रकार जलके विषय नग्न होंकर स्नान करके और नंगी बगानी स्त्रीनूं देखके एक दिन भोजन न करें इति ॥ १ ॥ नग्न शब्दका अर्थ दिखातेंहैं नग्न इति एकवस्त्र वाला पुरुष नग्न होताहै इस वचनतें दो २ वस्त्र लय करके अर्थात् धोती और एक उपरणा

तद्युगपदनेकव्रणेषु खरकृम्युत्पत्तौज्ञेयम् ॥ अत्रक्षत्रियादीनांपादपादन्यूनम् ॥ दिवामैथुनादौतुशंखः ॥ दिवाचमैथुनंकृत्वानग्नःस्नात्वातथांभसि नग्नांपरस्त्रियंदृष्ट्वादिनमेकमभोजनमिति ॥ १ ॥ नग्नस्त्वेकवासाःस्यादितिवचनाद्वस्त्रद्वयवान्स्नायादित्यर्थः अत्रनग्नस्नानादावेकरात्रत्रिरात्रयोरभ्यासाद्यपेक्षयाव्यवस्था द्रष्टव्या निषिद्धकाष्ठदंतधावने वृद्धपाराशरःप्राह ॥ पलाशशिंशपाकाष्ठदंतधावनकृन्नरः दिवाकीर्तिसमस्तावद्यावद्गांनैवपश्यतीति ॥ १ ॥ एतच्चनिषिद्धकाष्ठांतराणामप्युपलक्षणम् ॥

इनानूं धार करके स्नान करे ॥ इस स्थानमें नग्न स्नानादियोंके विषय एक रात्र और तीन ३ रात्र इनकी व्यवस्था अभ्यासादियोंकी इच्छा करके जाननी अर्थात् कामतें अभ्यासके विषय तीन ३ रात्र उपवास जानना ॥ निषिद्ध काष्ठकी दातनके विषय वृद्धपाराशरजी कहतेंहैं पलेति पलाह और टाली इनके काष्ठांकी दातन करणे वाला पुरुष तितना पर्यंत नाईके तुल्य होवाहै जितना पर्यंत गौकों न देखे ॥ १ ॥ पलाशशिंशपा इस पद करकें खजूर उीर केंउडा और नारकेल इत्यादि जों निषद्धे काष्ठ हि इनकाभी ग्रहणकरणा

ब्रह्मचारीके धर्मके नाशके विषय बौधायनजीका वाक्यहै शौचेति शौच और आचमन और संध्यावंदन और कुशा और भिक्षा और होम इनका त्याग और शूद्रादिके साथ स्पर्श और कौपीन और कटिसूत्र और यज्ञोपवीत और तडागी और दंड और मृगाचर्म इनका त्याग और दिने सौणा और छतडीका धारणा और पौये पाणे और पुष्पादि मालाका धारण करणा और बुटना मलना और चंदनादि सुगंधि वाले द्रव्यका मलना और सुरमा पाणा और जलक्रीडा और जूवाखेलणा और नृत्य अर गायन अर वाजा इनके विषय प्रीति करणी और पाषंडी अर चंडाल इत्यादियोंके साथ संभाषण करणा

ब्रह्मचारिधर्मलोपेबौधायनः॥ शौचाचमनसंध्यावंदन दर्भभिक्षाग्निकार्यराहित्यशूद्रादिस्पर्शन कौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजिनवर्जन दिवास्वाप छत्रधारण पादुकाध्यारोहण मालाधारणोद्वर्त्तनानुलेपनांजनजलक्रीडाद्यूतनृत्यगीतवाद्याद्यभिरति पाषंडिचंडालादिसंभाषण पर्युषितभोजनादि ब्रह्मचारिव्रतलोपसकलनिर्हारार्थं ब्रह्मचारी कृच्छ्रत्रयंचरेत् महाव्याहृतिहोमंचकुर्यात् प्रथमंव्यस्तसमस्तव्याहृतिभिश्चतस्रआज्याहुतीर्हुत्वा॥ ॐभूरग्नयेपृथिव्यै महतेचस्वाहा ॐभुवोवायवे चांतरिक्षायमहतेचस्वाहा ॐस्वरादित्यायचदिवेचमहतेचस्वाहा ॐभूर्भुवःस्वश्चंद्रमसेचनक्षत्रेभ्यश्चमहतेचस्वाहा ॐपाहिनोअग्नएनसेस्वाहा

और वेहे अन्नका भक्षण करणा इन संपूर्णोंके विषय और ब्रह्मचर्य व्रतके नाशके विषय संपूर्णपापके त्यागणाके अर्थ ब्रह्मचारी तीन ३ कृच्छ्र व्रत करे अर महाव्याहृतिआं करके हवन करे अर प्रथम एक एक महाव्याहृति करके तीन ३ आहुतिआं करे पश्चात् सभना महाव्याहृतिआं करके क्या ॐभूः स्वाहा १ ॐभुवःस्वाहा २ ॐस्वःस्वाहा ३ ॐभूर्भुवःस्वःस्वाहा ४ इसरीतिसें तीनके पीछे एक आहुति करे इस प्रकार व्याहृतिआं करकें चार घृतकीआं आहुतिआं करके पश्चात् ॐपाहिनो अग्न एनसेस्वाहा इत्यादि करके हवन करे सो मूलमेंहि स्पष्टकीता होआहै ॥

जैसे बउ १ आहुति करके पुनारेति फेर महाव्या हृतिआंकर्के हवनकरे इति एह प्रायश्चित्त थोड़े धर्मके नाशके विषय करणा ॥ अर बहुते धर्मकेनाशके विषय अधिक प्रायश्चित्तनूं ऋग् विधान ग्रंथ विषय शौनकजी कहतेहैं तमिति श्मशानके शिवालयके विषय बैठकरके(तंवोधिया)इत्यादि मंत्रकाएक लक्ष १००००० जपकरे ब्रह्मचारिका धर्म शून्यभी होवे तदभी इसजपकरके पूर्ण हो ताहै इति ॥ ग्रहण कीता होआ जो व्रत तिसके भंगके विषय वायुपुराणमें लिखाहै लोभेति लो भ और मोह और प्रमाद इनसें कदाचित् व्रतभंग होवे तब तीन ३ उपवास व्रत करे अथवा

ॐपाहिनोऽग्नेविश्ववेदसेस्वाहा ॥ ॐयज्ञंपाहिविभावसोस्वाहा ॥ ॐसर्वं पाहिशतक्रतोस्वाहा ॥ ॐपुनरूर्जानिवर्त्तस्वपुनरग्नइषायुषा पुनर्नःपाह्यं हसः सहरय्यानिवर्त्तस्वाग्नेपिवस्वधारयाविश्वशियाविश्वतस्परिस्वाहा पुनर्व्याहृतिभिर्जुहुयादिति ॥ एतदल्पधर्मलोपे ॥ वाहुल्येतु प्रायश्चित्तवि शेषमाह ऋग्विधानेशौनकः ॥ तंवोधियाजपेन्मंत्रंलक्षंप्रेत्याशिवालये ब्रह्म चारिणोहिधर्मशून्यंचेत्पूर्णमेवहीति प्रेतानांयोग्यंस्थानंप्रेत्यंश्मशानमित्य र्थः॥ गृहीतव्रतभंगेवायुपुराणे॥ लोभान्मोहात्प्रमादाद्वाव्रतभंगोयदाभवेत् उपवासत्रयंकुर्यात्कुर्याद्वाकेशमुंडनम् प्रायश्चित्तमिदंकृत्वापुनरेवव्रतीभवेत् अत्र वाशब्दः॥ समुच्चयेमिथ्याशपथे यमः ॥ विप्रस्यवधसंयुक्तंकृत्वातुशप थंमृषा ब्रह्महायावकान्नेनव्रतंचांद्रायणंचरेत् ॥ १ ॥ एतच्चशपथांतर स्याप्युपलक्षकम् ॥

केशांकामुंडनकरावे ॥ इस प्रायश्चित्तनूं करके पश्चात्व्रतकाधारणकरे १ झूठीसुगंदके विषय यमजी का वचनहै विप्रेति ॥ मैंने ब्रह्महत्याकीतीहै जेकरएह कामकीताहे ऐसे ब्राह्मणकी झूठी सुगंद चु ककें ब्रह्मघाती होताहै सो यवांके अन्नकरके चांद्रायण व्रतनूं करे ॥ १ ॥ और सुगंदकाभी एही प्रायश्चित्त जानना अर्थात् और तरहांसेभी जेकर कोई शपथकरेगा कि मेरेकोंगौकी शपथ है जैमे वेश्या द्वारपरभीगयाहोयांइत्यादि तौभी यावकान्न करके चान्द्रायण व्रत करे ॥

सुकृतमिति जेहे पुरुष संपूर्ण आयुषाके विषय कीते होए पुण्य नू किसेके तांई देदेतेहैं सो ध र्म्मराज जीकी आज्ञासे शिलाकर्के पेषणकरीदेहैं जिस प्रकारतैसै पापी पुरुष पेषण करीदेहै १ इहमार्कंडेयपुराणकेवाक्यतें जानना ॥ औसे स्थानों विषेप्रायश्चित्तकी व्यवस्था करदेहैं यत्रेति जि स स्थानमें प्रायश्चित्त कथन कीताहै अथवा जिस स्थानमें नहि कथन कीताहै इस उशनसजीके वाक्यतें तिस स्थानके विषय प्राजापत्य व्रत कल्पन करणा ॥ ब्राह्मणकों क्षत्रियादि वृत्ति करके धनके संचयकरणेमें प्रचेतसजीनें कहाहै ॥ ब्राह्मणेति पिता और माता और बहु भृत्य इनके ना शके विषय आपदसमयमें क्षत्रीके धर्मनूं ब्राह्मण जब अंगीकार करे अर तिसके विषय एक वर्ष

सुकृतंयेप्रयच्छंति यावज्जीवकृतंनराः तेपिष्यंतेशिलापेषैर्यथैतेपापकारिण इतिमार्कंडेयपुराणवाक्यात् यत्रोक्तंयत्रवानोक्तमित्यौशनसवाक्यात्तत्र प्राजापत्यः ॥ कल्पनीयःब्राह्मणस्यक्षत्रियादिवृत्त्याधनार्जने प्रचेताः । ब्रा ह्मणस्यापत्कालेपितृमातृबहुभृत्यस्यानंतरंक्षत्रोपनिवेशः आपत्कालमेवद र्शयति पित्रिति पित्राद्यभावेक्षत्रोपनिवेशः क्षत्रधर्म्मस्वीकारश्चेत्तदा तत्रे त्यादि तत्रसंवत्सरमर्थप्राप्तौ ॥ चांद्रायणंचरेदिति वैश्यवृत्तिर्जीवने तत्र वर्षाभ्यंतरे मासादौचांद्रायणभागहारःकल्पनीयः संवत्सरादूर्ध्वंद्विगुणत्रै गुण्यादिकल्पनीयम् शूद्रवृत्त्याधनार्जने मनुः ॥ नकथंचनकुर्वीतब्राह्मणः कर्मवार्षलम् वृषलःकर्मवाब्राह्मंपतनीयेहितेतयोः ॥ १ ॥ वार्षलंकर्म सेवा

व्यतीतहोजावें तब चांद्रायणव्रतकरे। अर जब वैश्यवृत्ति करके उपजीविकाकरे अर तिसस्थान के विषय वर्षके मध्यमेंहि मासादिके व्यतीतहोनेमें चंद्रायणव्रतके तीन ३ भाग अर्थात् तीनपा द कल्पन करणे योग्यहैं अर जेकदाचित् वर्षतें उपरंतहोजाए तब कालके अनुसारदूणा अथ वा त्रीणाइत्यादि चांद्रायणव्रत कल्पना करणे योग्यहैं ॥ शूद्रवृत्ति करके धनके एकत्रकरणेमें मनुजीने कहाहै नेति ब्राह्मण शूद्रके कर्म नूं कदाचित् भी न करे अर्थात् सेवा न करे अर शूद्र ब्राह्मणके कर्मनूं न करे क्योंकि ब्राह्मण और शूद्र इनोको परस्पर कीतेहोये कर्म पतित कर देते हैं ॥ १ ॥

इसप्रकार उपक्रम कर्के फेर उपनयन कर्मके साथ कृच्छ्रादि व्रतकी पश्चात् प्रवृत्तिके विषय मनुजीकावाक्यहै प्रेति परकर्मके विषये स्थित होकर जेडे ब्राह्मण और क्षत्री अथवा वैश्य प्रायश्चित्त नूं करतेहैं और अपणी जातितें भ्रष्ट होए होएजो ब्राह्मणहैं तिनांकोभी एही प्रायश्चित्त कथन करे १ ॥ शूद्रकोंभी ब्राह्मण औरक्षत्री अथवा वैश्यके कर्मकरणेके विषय एहि प्रायश्चित्तहै क्योंकि शूद्रकों भी पर कर्म होनेसें अर्थात् निंदित कर्म होनेसें परंतुपरवृत्तिकर्के एकत्र कीता होआ जो धनहै तिस त्यागके सहित एह प्रायश्चित्त है क्योंकि जिस कारणतें निंदित कर्म केधन नूं संचितकरतेहैं सो तिसधनके त्यागणेते पीछे प्रायश्चित्त से शुद्ध होतेहै इस मनुके बचनतें जानना ॥ स्त्रीके धन कर्के उपजीविका करणेमे कहते हैं चांद्रेति एक चांद्रायण व्रत कर्के संपूर्ण पापांका नाश होताहैं सोधन स्त्रीके तांई दे करके चांद्रा

एवमुपक्रम्य पुनरुपनयनसहितकृच्छ्राद्यनुवृत्तौ सएव ॥ प्रायश्चित्तंप्रकुर्वंतिविकर्मस्थास्तुयेद्विजाःब्राह्मण्याच्चपरित्यक्तास्तेपामप्येतमादिशेत् १ ॥ शूद्रस्यापिद्विजकर्मकरणेऽप्येतदेव ॥तस्यापि तद्विकर्मत्वात् अर्जितधनत्यागपूर्वकंचैतत् ॥ यद्गर्हितेनार्जयंतीति मनूक्तेः ॥ स्त्रीधनोपजीवनेतु सएव चांद्रायणेनचैकेन सर्वपापक्षयोभवेत् ॥ चान्द्रायणंस्त्रियैतद्धनंदत्वाकार्य्यम् ॥ भार्यायामुखमैथुनेतूशनाः ॥ यस्तुब्राह्मणोधर्मपत्नीमुखेमैथुनंसेवेतसदुष्यतीति वैवस्वतः ॥ प्राजापत्येनशुद्ध्यतीति ॥ गोयुक्तयानस्थस्यमैथुनेयमः ॥ यदिगोभिःसमायुक्तंयानमारुह्यवैद्विजः मैथुनंसेवतेचैवमनुःस्वायंभुवोऽब्रवीत् ॥ १ ॥ त्रिरात्रंक्षपणंकृत्वासचैलस्नानमाचरेत् गोभ्योथवसकंदद्याद्घृतंप्राश्यविशुद्ध्यतीति ॥ २ ॥ यत्तु स्मरणम्

यण व्रत करणा स्त्रीधन इस जगाडोहै जो विवाह विषे पित्रांदियोंने दित्ताथा और श्वशुरके घर पाद वंदनके समय दित्ताहै ॥ स्त्रीके मुखके विषय मैथुन करणेमें उशनसका वचन है यइति जो ब्राह्मण अपणी धर्म पत्नीके अर्थात् विवाहिता स्त्रीके मुखमे मैथुन करताहै सो पतित होताहै अर्थात् पापी होताहै इसका प्रायश्चित्त वैवस्वत मनुजीने कहाहै कि प्राजापत्य व्रत कर्के सो शुद्ध होताहे इति ॥ वैल कर्के युक्त जो गाडी तिसके विषय स्थित पुरुषके मैथुनमें यमजीका वचनहै यदीति जद ब्राह्मण और क्षत्री अथवा वैश्य वैल कर्के युक्त जो गाडी किसके विषय स्थित होकर्के मैथुन करताहै इसमे स्वायंभुव मनुजी कहते भये ॥ १ ॥ तीन ३ रात्र उपवास कों कर्के सहित वस्त्रांदे स्नान करे अर वैलांके तांई घासदेदेवे अर्थात् वैलांनू चारे पश्चात् घृतका भक्षणकरे तो शुद्धहोताहै ॥ २ ॥ जो कथनहै

मैथुनमिति ब्राह्मण और क्षत्री अथवा वैश्य वैलां कर्के संयुक्त जो गाडी तिसके विषयस्थित होकर्के स्त्रीके अथवा पुरुषके साथ दिनमे मैथुनकों करताहै सो सहित वस्त्रांके स्नानकरे । १ । एह अकामतें एक वारकरणेके विषय जानना ॥ अर काम कर्के पुरुषके साथ मैथुन करणेका प्रायश्चित्त जाति वंशादिके विषय कहाहै । तूं मेरीमाताके समानहैं ऐसे जो पुरुष क्रोधतें अपणी स्त्रीकों कह कर्के फेर मैथुनके वास्ते इच्छा करताहै तिसके विषय पराशरजीने कहाहै यइति जो पुरुष क्रुद्धहो कर्के अपणी स्त्रीकों मैथुनके अयोग्यनूं कहताहै अर्थात् तूं मेरी माताहैं ऐसें वचन कहताहै अर फेर मैथुनके वास्ते इच्छा करताहै सो पुरुष ब्राह्मणांके मध्यमें अपणे प्रायश्चित्त कों कथन करवाए । १ । इसीमें औरवचन है आर्तइति आर्त्त क्या दुःखी अथवा क्रोध अथवा अज्ञान अथवा क्षुधा अथवा तृषा अथवा भय इनां कर्के पीडित होआ होआ

मैथुनंतुसमासाद्य पुंसियोषितिवाद्विजः गोयानेप्सुदिवाचैवंसवासाःस्नानमाचरेत्१ तदकामतः सकृत्करणेज्ञेयम् क्रोधाद्भार्यांत्वंमेमाम्रासदृशीत्युक्त्वा पुनःसंभोगेपराशरः । यस्तुक्रुद्धःपुमान्ब्रूयाज्जायायास्त्वगम्यताम् पुनरिच्छतिभर्यांचविप्रमध्येतुवाचयेत् १ आर्त्तःक्रुद्धस्तमोघोवाक्षुत्पिपासाभयर्दितःदानंपुण्यमकृत्वावा प्रायश्चित्तंदिनत्रयम् २ उपस्पृशेत्त्रिषवणंमहानद्युपसंगमे स्नानांतेचैवगांदद्याद्ब्राह्मणान्भोजयेद्दशेति ३ वाचयेत्स्वस्यप्रायश्चित्तस्योपदेशंकारयेत् पुण्यंयागादिसंकल्पितंदानयागाद्यकृत्वेत्यर्थः वस्तिकर्मणियमः । वस्तिकर्मणिरूढेश्चप्रच्छर्दनविरेचनैः शिशुकृच्छ्रेणशुद्ध्येततस्मात्पापान्नसंशयः १ प्रच्छर्दनविरेचनयोरभ्यासएवशिशुकृच्छ्रःअन्यत्रतुस्नानमात्रम्

दान और यज्ञादि नूं न कर्के तिसस्त्रीनूं गमन करे तां प्रायश्चित्त तीन ३ दिन करे । २ । और जेकर दानादि होण तो व्रतका प्रयोजन नहि तिसके विना कहतेहैं उपेति अर तीन काल महानदीके संगमके विषय स्नान करे और स्नानके अंतमें गौसंकल्प करे और दश १० ब्राह्मणा नूं भोजन खुलावे ॥ ३ ॥ वस्तिकर्मके विषय यमजीका वचनहै वस्तीति मूत्राशयकी चिकित्साकानाम वस्तिकर्महै मूत्राशयके शोधन करणके वास्ते उलटी अथवा जिलाब करवाए तिस पापतें पुरुष शिशु कृच्छ्र व्रतकर्के शुद्ध होताहै इसमें संदेह नहि । १ उलटी और जुलाबके अभ्यासके विषय शिशुकृच्छ्र व्रत नूं करे जेकरकदाचित् करवाए तद स्नान कर्के हि शुद्ध होजाताहै अर वस्तिकर्मका स्वरूपदेखणा होवे तब भाव प्रकाशमें देखलेणा

तिस प्रकार अजीर्णादिकेविषयभी यमजीका कथनहै । अजीति अन्नकान पचना और पूर्वकहा
जो अभ्युदित और उद्वमन और क्षौर कर्म और मैथुन और खोटा स्वप्न और दुष्ट पुरुषके साथ
स्पर्श इनके विषयमें स्नान मात्र अर्थात् केवल स्नानाहि कहाहै । २ । देवताके मंदिरके शिलादि
करके अपने गृहके बनानेमेंयमजो निंदाकरतेहैं इष्टेति देवताके मंदिरमे लगिआंहोआं जो पकि
आं इष्टां और काष्ट और लोहा और पाषाण इनानूं स्था करके लोभतें अपणे गृहके विषय जो
पुरुष जोड़तें हैं अर्थात् इनां करके अपणे गृहनूं बनातेहैं । १ । सो एकले और भयभीत और
क्षुधातृषा करके दुःखी होए होए जितना पर्यंत पापका नाश नहि होता तितना पर्यंत बंधनमें

तथाच सएव ॥ अजीर्णेऽभ्युदितेवान्तेश्मश्रुकर्मणिमैथुने दुःस्वप्नेदुर्जनस्प
र्शेस्नानमात्रंविधीयते ॥ २ ॥ देवागारशिलादिना स्वगृहकरणंनिंदति यमः
इष्टकाकाष्ठलोहाश्मदेवालयसमन्वितम् गृहीत्वात्मगृहेचैवलोभाद्येयोजयं
तिये १ ॥ एकाकिनस्तथोद्विग्नाः क्षुत्तृषापरिपीडिताःबंधनेतेतुतिष्ठंतियाव
त्पापस्यसंक्षयः २ ॥ अत्र प्राजापत्यचान्द्रायणादिकल्प्यम् ॥ वानप्रस्थय
त्योर्व्रतभंगे सएव वानप्रस्थोदीक्षाभेदेकृच्छ्रंद्वादशरात्रंचरित्वामहाकक्षंव
र्द्धयेत् ॥ भिक्षुर्वानप्रस्थवत्सोमवृद्धिवर्जंस्वशास्त्रसंस्कारंचेति दीक्षाभे
दोयमनियमातिक्रमः महाकक्षमौषधवनप्रदेशमुदकसेचनादिना वर्द्धयेत
सोमशब्देनौषधिसामान्यंलक्ष्यते ॥ तद्वृद्धिःपरंभिक्षोर्निवर्तते परंतु स
ममित्यर्थः स्वशास्त्रसंस्कारः प्राणायामाभ्यासः ॥

अर्थात् नरकमें स्थित होतेहैं ॥ २ ॥ इसके विषय प्रायश्चित्त प्राजापत्य और चांद्रायणादिव्रत
कल्पन करणा ॥ वानप्रस्थ और यति के व्रत भंगमेंभी यमजीका वचनहै ॥ वानेति वानप्रस्थी
जब यम और नियम कर्मांका उल्लंघन करे तब द्वादश १२ रात्रके कृच्छ्र व्रत नूं करके पश्चात्
औषधिके बन नूं जलके सेचन करणे करके बधावे ॥ और संन्यासी भी जब यम और
नियमादि कर्मांका उल्लंघन करे तब औषधिकी वृद्धितें बिना अपणे शास्त्रके संस्कारनूं करे अ
र्थात् प्राणायामके अभ्यास नूं करे अर औषधिआंकी वृद्धिका संन्यासीको निषेधकिताहै (दीक्षा
भेदोयमनियमातिक्रमः) इत्यादि पदां करके पूर्वले वाक्यका हि अर्थ स्पष्ट कीताहै ॥

हारीतजीका वाक्यहै झूठ और चुगली इनके वचनमे अर्थात् झूठ और चुगली कथन करके संन्यासी तप्त कृच्छ्र व्रत नूं करे ॥ क्रोध और अहंकार और चुगली इनके विषय छागलेय जीका कथनहै व्रतेति संन्यासियोंके जो व्रत अर तिसी प्रकार जो उपव्रत हैं इनां मेसें एक एकके भी उल्लंघनके विषय प्रायश्चित्त विधानकरीदाहै कि एक १ दिन रात्र उपवासनूं रक्षकरके पश्चात् कृच्छ्र व्रतके सहित चांद्रायण व्रत नूं करे ॥ १ ॥ व्रत और उपव्रतां नूं बौधायनजी कहतेहैं आदिके विषय मौनिके व्रतांनूं कहतेहैं ॥ अहिंसेति जीवोंकों न मारणा और सत्य कहणा और चोरी न करणी और मैथुन नकरणा एह संन्यासीके व्रत कहे हैं ॥ इसतें उपरंत उपव्रतांनूं कहतेहैं अक्रोध इति क्रोध न करणा और गुरुकी शुश्रूषा करणी और सर्वदा काल प्रसन्न

हारीतः अनृतपिशुनवचने भिक्षूणांतप्तकृच्छ्रः ॥ क्रोधाहंकारपिशुनेषुच छागलेयः ॥ व्रतानियानिभिक्षूणांतथैवोपव्रतानिच एकैकातिक्रमेतेषांप्रायश्चित्तंविधीयते अहोरात्रोपितोभूत्वाकृच्छ्रचांद्रायणंचरेत् १। कृच्छ्रपदंचांद्रायणविशेषणम् व्रतोपव्रतान्याह बौधायनः अथ मौनिव्रतानि। अहिंसा सत्यवचनमस्तेयंमैथुनस्यचवर्जनम् ॥ अथोपव्रतानि ॥ अक्रोधोगुरुशुश्रूषाप्रसादशौचमाहारशुद्धिश्चेति जलप्रतिविंबदर्शनादौयाज्ञवल्क्यः ॥ मयितेजइतिच्छायांस्वांदृष्ट्वांवुनिवैजपेत् सावित्रीमशुचौदृष्टेचापलेचानृतेपिच ॥ १ मयितेज इतिमंत्रोवाजसनेयिप्रसिद्धः

रहणा और शौच करणी और शुद्ध भोजन करणा एह उपव्रत कथन कीते हैं ॥ जलके विषय छायाके दर्शनादिमें अर्थात् जलमें अपना स्वरूपदेखनेमे याज्ञवल्क्यजीने कहाहै मयीति जलके विषय अपणी छायानूं देखकरके (मयितेजः) इत्यादि वाजसनेयिके मंत्र नूं जपे और अशुद्धवस्तुके दर्शनमें अर चित्तकीअनवस्थिति औरझूठवचन इनके विषयमें सावित्रीनूं जपे अर्थात् गायत्रीका जप करे ॥ १ ॥ इसजगा मयितेज इसमंत्रका और गायत्रीका जप एकवारहि करणा चाहिए और जेकर बहुतवार प्रतिविंबादि दर्शनहोवे तों बहुवार करणा

अशुचिस्थान और मूत्र और पुरीषादि और अनवस्थिति और निरर्थक शरीरकी क्रिया और अंगीकार करके पश्चात् झूठ कथन करणा इनके विषय हारीतजीका वाक्यहै ॥ प्रतीति जोपुरुष प्रथम अंगीकार करके पश्चात् झूठ अथवा मिथ्याकों सत्य कथन करे सो तप्तकृच्छ्रके सहित चांद्रायण व्रतकों करे ॥ १ ॥ एहवाक्य गुरुकों प्रथम कथन कीता जो है क्याकि मैं तुसाडा एह काम करांगा अथवामैं तुसानूं एह वस्तु दिआंगा इतना वचन कहकर पश्चात् न करणा तिसके विषय जानना क्योंकि प्रायश्चित्तकों बडाहोणेते । भोजन कालके विषय जो मौनव्रतहै तिसके नाशके विषय पराशरजीका वचनहै मौनेति मौन व्रतकों अंगीकार करके ब्राह्मण और क्षत्री अथवा शूद्र स्थित होआ होआ न कथन करे अर्थात् भोजनतें पहले बोल णाथा तिस विषय न बोले अर भोजन भक्षण करदा होआ जो बोलें सो पुरुष शेष अन्ननूं त्यागदेवे क्या बोलणेतें पीछे भोजन न करे ॥ १ ॥ केवल मुखकर्के

अशुचौ मूत्रपुरीषादौचापले वृथाचेष्टायांप्रतिश्रुत्यानृतोक्तौहारीतः॥ प्रति श्रुत्यानृतंब्रूयान्मिथ्यासत्यमथापिवा सतप्तकृच्छ्रसहितंचरेच्चान्द्रायणव्रत मिति।१।गुरुवस्तुविषयकप्रतिश्रुताकरणपरमेतत् प्रायश्चित्तस्य गुरुत्वात् भोजनकालीनमौनव्रतलोपे पराशरः मौनव्रतंसमाश्रित्यआसीनोनवदेद् द्विजः भुंजानोहिवदेद्यस्तुतदन्नंपरिवर्जयेत् ॥१॥ केवलमुखेन जलपानेस एव । विद्यमानेषुहस्तेषुब्राह्मणोज्ञानदुर्बलः तोयंपिबतिवक्त्रेणश्वयोनौजाय तेध्रुवम् ।२। असपिंडैःसहरोदने पारस्करः। मृतस्यबांधवैःसार्द्धंकृत्वातुपारि देवनम् वर्जयेत्तदहोरात्रंदानंश्राद्धादिकर्मचेत्यनेनैकाहः॥१॥एतच्च कामतः अकामतस्तुस्नानमेव ॥ प्रेतालंकरणेशंखः॥कृच्छ्रपादःसपिंडस्यप्रेतालंकर णेकृतेअज्ञानादुपवासःस्यादशक्तौस्नानमिष्यतइति॥ १ ॥ कामतोद्विगुणम्

जल पीणेकें विषयभी पराशरनेंहि कहाहै विद्येति हत्थांके हुंदिआं जो ज्ञानदुर्बल अर्थात् मूर्ख ब्राह्मण जलकों केवल मुख करकें पीवताहै अर्थात् लंम्मा पैकर मुखके साथ पान करता है सो निश्चय करकें कुत्तेकी योनिकों प्राप्त होताहै ॥ २ ॥ असपिंडांके साथ रुदन करणके विषय पारस्करजीका कथनहै मृतेति मृत होआ जो कोई असंबंधी पुरुषहै तिस के संबंधिआंके साथ रुदननूं करके तिस दिन रात्रके विषय दान और श्राद्ध अर आदिपद करके तर्पणादि इनानूं न करे क्योंकि तिसतें वोह अशुद्धहै १ सो एह इच्छा करके जब करे तब एक दिन वर्जन करे अर जब इच्छासें न करे तब स्नान करकेंहि शुद्ध होताहै ॥ १ ॥ प्रेतके भूषण करणे विषय शंखजीका वचनहै कृच्छ्रेति भिन्न पिंड वाला जो प्रेतहै तिसके भूषण करणेमें अर्थात् स्नानादि कराणेमें कृच्छ्र व्रतका एक पाद करे अर जब अज्ञानतें करवाए तब एक दिन उपवास करे अर जब इसमे शक्ति न होवे तब स्नानमात्रहि इच्छितहै ॥ १ ॥ अर कामके विषयमें दूणा प्रायश्चित्त करे ॥

जो तप्त कृच्छ्रकी प्रवृत्तिके विषय अंगिराजी का वाक्यहै कि आत्मत्याग करणवाले प्रेतोंके संस्कार करणके विषय अर्थात् शवोंके स्नानादि करवाणेमें पातकी होताहै अर्थात् तप्त कृच्छ्र व्रत करके शुद्ध होताहै सो एह वाक्य अभ्यासके विषयमें जानना ॥ सजाति और भिन्न जाति के शवके पीछे गमनके विषयमें मनुजीका वचनहै अन्विति सजाति और भिन्नजाति वाला जो शवहै तिसके पीछे इच्छासें जो पुरुष जाताहै अर्थात् मुरदेके दाह करण वास्तें जो साथ जाताहै सो सहित वस्त्रोंके स्नान करके और अग्निनूं स्पर्श करके अर घृतका भक्षण करे तो शुद्ध होताहै ॥ १ ॥ इस स्थानमें इच्छया इस पदके ग्रहण करणेसें एह कामके विषयमें जानना ॥ अर अकामके विषयमें केवल स्नानहि कथन कीताहै ॥ फेर याज्ञवल्क्यने जो कहाहै कि ब्राह्मेति भिन्न पिंड वाले ब्राह्मणने ब्राह्मण और क्षत्री

यत्तु तप्तकृच्छ्रानुवृत्तौ अंगिराः ॥ आत्मत्यागिनांच संस्कर्तौ तदस्तुपा तककारीचेति तदभ्यासे॥समानेतरजातिप्रेतानुगमने मनुः। अनुगम्येच्छ याप्रेतंज्ञातिमज्ञातिमेवच स्नात्वासचैलःस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीति १ अत्रेच्छयेतिग्रहणादेतत्कामतः अकामतस्तुस्नानमेव यत्तुयाज्ञवल्क्यः ब्राह्मणेनानुगंतव्योनशूद्रोनद्विजःक्वचित् अनुगम्यांभसिस्नात्वास्पृष्ट्वाग्निं घृतभुक्शुचिः ॥१॥ ब्राह्मणेनासपिंडेन द्विजोविप्रादिः ॥ अस्यचघृतप्राशन स्यभोजनकार्यविधाने प्रमाणाभावान्नभोजननिवृत्तिरितिमिताक्षरायाम् तन्मानवसमानविषयम् ॥ वस्तुतोघृतस्यप्रायश्चित्तार्थत्वादभोजनमेवयु क्तम् अतएववसिष्ठेन मनुष्यास्थिस्निग्धंस्पृष्ट्वात्रिरात्रमस्निग्धेत्वहोरात्रं शवानुगमनेचैवमिति ॥

और वैश्य अथवा शूद्र इनके मृत होयां पीछे गमन नहि करणे योग्य जे कदाचित् जाएभी तब जलके विषय स्नान करके अर अग्निनूं स्पर्श करके और घृतका भक्षण करके शुद्ध होवाहै ॥ १ ॥ इस घृतभक्षणकों भोजन कार्यकी विधिके विषयमें अप्रमाण होणेतें उर भोज न की निवृत्ति नहि जाननी एह मिताक्षरामें लिखाहै सो मनुजीके वचनके तुल्यहि जानना वास्त वतें घृत भक्षणकों प्रायश्चित्तके अर्थ होणेतें भोजन नहि भक्षण करणे योग्य ॥ इसी कारणसें वसिष्ठजीने कहाहै मनुष्येति पुरुषकी नवीन हड्डीका स्पर्श करके तीन ३ रात्र उपवास करे अर पुराणी हड्डीका स्पर्श करके एक १ दिन रात्र उपवास करे इसी प्रकार शवके पीछे गमनके विषय जानना चाहिए ॥

विप्रेति ब्राह्मण प्रेतके पीछे गमनके विषय एक दिन कथन करणेतें क्षत्री प्रेत और वैश्य प्रेत के पीछे गमनके विषय कुछक अधिक प्रायश्चित्त कल्पन करणा चाहिए ॥ ब्राह्मणकों शूद्रके पीछे गमनके विषय पराशरजीका वाक्यहै । प्रेतीति लेजाईदे होए शूद्र शवके पीछे जो मूर्ख ब्राह्मण जाताहै सो तीन ३ रात्र व्रत करके शुद्ध होताहै ॥ १ ॥ तीन रात्र व्रतके कीतिआं होआं पश्चात् समुद्रमे प्रवेश करण वाली जो नदी है तिसकों प्राप्त हो करके अर्थात् बडी नदीके विषय स्नान करके अर पश्चात् सौ १०० प्राणायाम कों करके और घृतका भक्षण करके शुद्ध होताहै ॥ २ ॥ इस स्थानमें घृत भक्षणकों शुद्धिके अर्थ कथन करणेतें भोजनका निषेध नहि एह वाक्य कामका विषयहै ॥ अकामके विषयमें इसतें आधा प्रायश्चित्त करणा ॥ इसी प्रकार क्षत्रीकों वैश्य और शूद्रप्रेतके पीछे गमनमें अर वैश्यकों शूद्र प्रेतके पीछे गमन करणेमें प्रायश्चित्त कल्पन करणा ॥ अग्निहोत्रादि कर्म और वा

विप्रानुगमने एकाहस्योक्तत्वात् क्षत्रियवैश्यानुगमने त्वधिकं कल्प्यम् ब्राह्मणस्य शूद्रानुगमने पराशरः ॥ प्रेतीभूतंतुयःशूद्रंब्राह्मणोज्ञानदुर्बलःअनुगच्छेन्नीयमानंसत्रिरात्रेणशुद्ध्यति १ त्रिरात्रेतुततश्चीर्णेनदींगत्वासमुद्रगाम् प्राणायामशतंकृत्वाघृतंप्राश्यविशुद्ध्यतीति २ अत्र घृतप्राशनस्य शुद्ध्यर्थाभिधानान्नभोजननिवृत्तिः॥ एतच्चकामतःअकामतस्त्वर्द्धम् ॥ एवं क्षत्रियस्यवैश्यशूद्रानुगमने वैश्यस्य शूद्रानुगमनेकल्प्यम् ॥ इष्टापूर्त्तशुभाशुभमहाकर्म्मस्वनुपहतानामपिऋत्विगाचार्यादीनांत्रीणि कृच्छ्राणि चान्द्रायणास्व्यसर्वप्रायश्चित्तमाह प्रयोगपारिजाते आचार्यः॥ सएवरजस्वलाकन्यारक्षणे प्रायश्चित्तमाह॥कन्यामृतुमतींशुद्धांकृत्वानिष्कृतिमात्मवान् तथातुकारयित्वातामुद्वहेतांनृशंसधीः १ दद्यात्तदृतुसंख्यागाःशक्तःकन्यापिता यदि दातव्यैकापिनिःस्वेनदानेतस्यायथाविधि ॥ २ ॥ तस्यागोर्दानेयथाविधि ऋतुसंख्याकाविधि यथास्यात्तथाऽचरणीयमित्यर्थः

पी कूपादि और शुभ और अशुभ एह जो महाकर्म हैं इनके विषयमे चतुर भी हैं ऋत्विक् और आचार्यादि इनकों भी त्रय कृच्छ्र और चांद्रायण संपूर्ण प्रायश्चित्तकों प्रयोग पारिजातमें आचार्यजी कथन करते भये ॥ सोई आचार्यजी रजस्वला कन्याके रक्षणमें प्रायश्चित्त कों कहते हैं । कन्यामिति ज्ञानवाला और नहि निंदाके योग्य बुद्धि जिसकी ऐसा पुरुष प्रथम प्रायश्चित्तकों करके अर कन्याकों भी प्रायश्चित्त करवाके पश्चात् ऋतुवाली कन्याकों विवाह लये ॥ १ ॥ दद्येति अर कन्याका पिता जद समर्थ होवे तब कन्याकी ऋतुके समान गौआं देवे अर्थात् जितनीयां ऋतु लंघीयां होण विवाहतक तितनीयां गौआंका दान करे एह अर्थ है अर कन्याके विधि पूर्वक दानके विषय निर्धननें भी एक गौ देणी योग्यहै परंतु तिस गौके दान विषय ऋतु संख्याके नाम करके संकल्प करणा ॥ २ ॥

सो गौआं जामाता को देणियां अथवा ब्राह्मणको इसका उत्तर कहतेहैं ॥ गा इति
अर कन्याका पिता धनी होवे तब ब्राह्मणांकों गौआं देवे अर जब निर्धन होवे तब दक्षिणा
मात्रदेवे तिस कारणतें ऋतुकी संख्याके समान ब्राह्मणांकों गौआं देवे अथवा कन्या पासों
दुवाए ॥ ३ ॥ उपोष्येति अर कन्या तीन ३ दिन उपवास रखकर पश्चात् रात्रिके विषय
गौआंके दुग्धकों पीवें जब ऋतुतें रहित कन्या होवे तिस कालके विषय कन्याके सां
ई भूषण देवे ऊीर तिस कन्याकों विवाहन वाला वर भी कूष्मांड संज्ञिक मंत्रों करके •
घृतका हवन करे ॥ ४ ॥ श्राद्ध और उपवासके दिनमें दातन करणके विषय विष्णु रहस्यमें लि
खाहै । श्राद्धविति श्राद्ध और उपवासके दिनमें दातनकों करके गायत्रीके सौ १००
मंत्र करके पवित्र होआ जो जलहै तिसका आचमन करके शुद्ध होताहै ॥ १ ॥ और

गादद्याद्ब्राह्मणेष्वेवानिःस्वोनिःस्वस्तुदक्षिणाम् तस्मात्तदृतुसंख्येषुब्राह्म
णेषुप्रदापयेत् ॥ ३॥ उपोष्यत्रिदिनंकन्यारात्रौपीत्वागवांपयः अदृष्टरज
सेदद्यात्कन्यायैतत्रभूषणम् तामुद्वहन्वरश्चापिकूष्मांडैर्जुहुयाद्घृतमिति४
श्राद्धोपवासदिने दंतधावने विष्णुरहस्ये ॥ श्राद्धोपवासदिवसेखादित्वादं
तधावनम् गायत्र्याःशतसंपूतमंवुप्राश्यविशुद्ध्यतीति ॥ १ ॥ अन्यान्यपिप्र
कीर्णकान्यपरार्के शंखः ॥ प्रेतस्यप्रेतकार्याण्यकृत्वाधनहारकः वर्णा
नांयद्वधेप्रोक्तंतदर्धंप्रयतश्चरेत्॥१॥ अतिमानादतिक्रोधाद्भयादज्ञानतोपि
वा उद्बध्नीयात्स्त्रीपुमान्वापिगतिरेषांनविद्यते ॥ २ ॥ पूयशोणितसंपूर्णेत
मस्यंधेसुदारुणे षष्टिवर्षसहस्राणिनरकेयद्रुपासते ॥ ३ ॥ गोभिर्हतं
तथोद्बद्धंब्राह्मणेनचघातितम् संस्पृशंनेतुयेविप्रागरदाश्चाग्निदाश्चये ॥ ४

भी प्रकीर्णक प्रायश्चित अपरार्कमें शंखजीने कथन कीते हैं ॥ प्रेतेति ॥ प्रेतके धन कों
ग्रहण करणे वाला जब प्रेतके कर्मांकों न करे तब वर्णांके हत करणेके विषय जो प्रा
यश्चित्त कहाहै तिसतें आधा प्रायश्चित्त इंद्रियोंकोंरोककरकरे १ अब और कहतेहैं अतीाति बहु
त मान और बहुत क्रोध और भय अथवा अज्ञान इनतें स्त्री अथवा पुरुष किसीकों
फांसी दे देवे तिनकी गति नहि होती । २ । तिनकी व्यवस्था कहतेहैं पूयेति पाक और रुधिर
करके पूर्ण होआ होआ और अंधकार करके युक्त और भयानक जो नरक है तिसके
विषय सठ हजार ६०००० वर्ष रहतेहैं ॥ ३ ॥ और कथन करतेहै ॥ गोभिरिति गौआंने
जो मारिआ है और तिस प्रकार फांसी ले करके जो मृत होआ है ऊीर ब्राह्मणने जो
मारिआ है इनाकों जेडे ब्राह्मण स्पर्श करते हैं और जेडे विषके देणे वाले हैं और जेडे
अग्निके देणे वालेहैं ॥ ४ ॥

अन्विति और जेंडे फांसी कर्के मृतहोयेके पीछे जातेहैं और जेडे पाशके छेदने वाले हैं सो संपूर्ण पापकर्के संयुक्तहोतेहैं तिनांकी शुद्धिनूं मैं कहताहुं । ५ । तप्तेति सो सब तप्तकृच्छ्र व्रतकर्के शुद्धहोतेहैं और ब्राह्मणांकोंभोजन खुलावें अर ब्राह्मणकेताई बैलकेसहित गौ दक्षिणादेवें ६ ॥ इहां एकवचन बहुवचनके स्थानजानना इसी विषयमें संवर्त्तजीका वाक्यहै गविति गौआंने जो ब्राह्मणने हतकीताहैं और आप पाश्यादिकर्के मृतहोआहै कल्याणकी इच्छा करदे जो सत्पुरुषहैं तिनानें इनके विषय रोदन न करणा चाहिए । १ । और कथन करतेहैं एषामिति इनांके मध्यमे एक किसी प्रेतनूं जो पुरुष आच्छादनकरताहै अथवा चुकताहै अथवाकटोदक क्रियानूं करताहै

अनुयातारोऽपियेचान्येयेचान्येपाशछेदकाः सर्वेतेपापसंयुक्तास्तेषांवक्ष्यामिनिष्कृतिम्॥ ५॥ तप्तकृच्छ्रेणशुध्यंतिकुर्याद्ब्राह्मणभोजनम् अनडुत्सहितां गांचदद्याद्विप्रायदक्षिणाम् ॥ ६ संवर्त्तः॥ गोभिर्हतेतथाविप्रेतथाचैवात्मघातिनि नैवाश्रुपातनंकार्यंसद्भिःश्रेयोऽभिकांक्षिभिः ॥ १ ॥ एषामन्यतमंप्रेतं योवसेतवहेतवा कटोदकक्रियांकृत्वातप्तकृच्छ्रंसमाचरेत् ॥ २ ॥ तच्छवंकेवलंस्पृष्टमश्रुवापातितंयदि पूर्वोक्तानामकर्त्ताचेदेकरात्रमभोजनम् ॥ ३ ॥ पूर्वोक्तानांकटोदकक्रियादीनामकर्त्ता केवलं तच्छवस्पर्शाश्रुपातकर्त्ताचेत्तदेदमल्पप्रायश्चित्तमिति ॥ तथा ॥ यआत्मत्यागिनःकुर्यात्स्नेहात्प्रेतक्रियां नरःसतप्तकृच्छ्रसहितंचरेच्चांद्रायणव्रतम् ॥ १ ॥ बुद्धिपूर्वकएतत् ॥

अर्थात् उठाणे वास्ते किड्डा बनाकर लेजाताहै और जल देताहै सो पुरुष तप्त कृच्छ्र नूं करे । २ । और कहतेहैं तदिति अर जिसने केवल शवकेसाथस्पर्श कीताहै अथवा रोदन कीताहै अर कटोदकादि क्रिया जिसने नहिकीती तिसको एक रात्र उपवास कहाहै॥३॥पूर्वोक्तानांइत्यादि पदों कर्के इसी श्लोकका हि अर्थ स्पष्ट कीताहै ॥ तिस प्रकार औरभी कहतेहैं यइति जो पुरुष आत्मत्यागीहै अर्थात् पाशादि कर्के जो आप मृत होआहै तिसकी प्रेतक्रिया नूं जो पुरुष स्नेहतें करताहै सो तप्त कृच्छ्रके सहित चांद्रायण व्रतनूं करे॥१॥एह ज्ञानके विषयमें जानना

इसी विषयमें यमजीका वाक्यहै नेति ब्राह्मणोंके दंड करके हतहोए जो पुरुषहैं तिनके अशौच और उदक और रोदन और निंदा और दया और तखतेका चुकणा इनां नूं नकरे ।१। ब्रह्म दंड नाम शापकाहै परंतु किसे नहीं ब्राह्मणांतें मृतहोवे सो सभ ब्रह्मदंडहत जानणा और कहतेहैं ॥ स्नेहाति स्नेह और अपना कोई कार्य तिसकी सिद्धि वास्ते और भय इत्यादितें जो पुरुष आत्मत्यागींके अशौचादि नूं करताहै सो गौआंके मूत्रकर्के यवांके आहार नूं करदा होया तप्तकृच्छ्र व्रत कर्के शुद्ध होताहै।२।एतानि इत्यादि पदोंमें इसी श्लोकका हि अर्थस्पष्टकीताहै और कथन करतेहैं कृत्वेति आत्मात्यागीकों अग्नि और उदक और स्नान करवाणा और स्पर्श

यमः ॥ नाशौचंनोदकंचाश्रुनापवादानुकंपने ब्रह्मदंडहतानांतुनकार्य्यंकट धारणम्॥१॥स्नेहकार्य्यभयादिभ्योयस्त्वेतानिसमाचरेत् गोमूत्रयावकाहारैः सतुकृच्छ्रेणशुध्यति॥२॥एतानिआत्मत्याग्याद्यशौचादीनि कटःशवखट्वा कृत्वाग्निमुदकंस्नानंस्पर्शंवहनमेवच रज्जुच्छेदाश्रुपातेच तप्तकृच्छ्रेणशुद्ध्यति॥३॥एतत्समुदितानां कर्म्मणां मतिपूर्वके संवर्त्तः वोढॄणामग्निदातॄणांसंविधानविधायिनाम् तप्तकृच्छ्रद्वयाच्छुद्धिरेकमेवानुयायिनाम् १संविधानविधायिनःप्रेतालंकारकारिणः एतदपिसमुदितकरणे

और चुकणा और पाशका छेदन और रोदन इना नूं जो पुरुष करदाहै सो तप्त कृच्छ्र व्रत कर्के शुद्ध होताहै ॥३॥ कथन कीते जो आत्मत्यागीके कर्महैं सभना इनकों ज्ञान कर्के जब करे तब एह प्रायश्चित्त जानना॥संवर्त्तजीका भी इसी विषयमें वाक्यहै वोढॄणामिति चुकणे वाले और अग्निके देणे वाले और प्रेतकों भूषण करणे वाले इन संपूर्णांको दो २ तप्त कृच्छ्रतें शुद्धि होतीहै और पिछे जान वाल्यांको एक तप्त कृच्छ्र कर्के शुद्धि होतीहै ॥ १ संविधान इस पदका हि अर्थ स्पष्ट कीताहै कथन कीते जो कर्महैं इनके विषय भीएभी जानना इति

उशनसजीका वचनहै प्रायेति ॥ अतिशयकरके लंघनलेणे और शस्त्र और अग्नि और विष और पाश और पर्वतके शृंग उपरों गिड कर और जल और काष्ठादि इनों करके जो पुरुष अपणे आपनू हत करताहै और राजा और ब्राह्मण और वडे वडे सर्प ॥ १ ॥ और शृंगांवाले और दाडांवाले और नखांवाले और सर्प बिजली इनों करके जो हत होआ है और तिसी प्रकार संकर जातितें उत्पन्नजो होआहै इनकों अशौच और जल और अग्नि इह न देवे २ ॥ तिनके स्पर्श अथवा रोदन इनके विषयमें एक १ दिन उपवास करे अर अज्ञानतें उद्वहनादिके विषयमें अर्थात् शवादिके उठाणे विषे सांतपन कृच्छ्रव्रतका आचरण करे ३ अर जान करककरे तेत्रगौके मूत्रके सहित यवांनूं भक्षणकरदा होआ कृच्छ्रव्रत करे अथवा तप्तकृच्छ्र व्रत करे व्रतमें शक्ति न होवे तव एक मास भिक्षा अन्न खावे ।४। कृत्वेति आपेमृत होयेके चुक

उशनाः ॥ प्रायानशनशस्त्राग्निविषोद्बंधभृगूदकैः काष्ठाद्यैश्चात्मनोहंतुर्नृपब्रह्मसरीसृपैः ॥ १ ॥ शृंगिदंष्ट्रिनखिव्यालविद्युताभिहतस्यच तथासंकरजातस्यनाशौचोदकवह्नयः ॥ २ ॥ तत्स्पर्शेयदिवाक्रोशेदिनमेकमभोजनम् अज्ञानोद्वहनादौतुकृच्छ्रंसांतपनंचरेत् ॥ ३ ॥ बुद्धिपूर्वेपुनस्तस्मिन्कृच्छ्रोगोमूत्रयावकः तप्तकृच्छ्रोप्यशक्तौतुमासंभिक्षाशनोपिवा ॥ ४ ॥ कृत्वातुवाहनादीनिप्रायश्चित्तमकुर्वताम् तप्तकृच्छ्रद्वयाच्छुद्धिरेकमेवानुयायिनाम् ॥५॥यस्त्वशेषाःक्रियाःकुर्यात्स्नेहान्मूल्येनवापुनः।भवेत्तस्यपुनस्तप्तकृच्छ्रचांद्रायणोत्तमः ॥ ६ ॥ बृहस्पतिः । विषोद्बंधनशस्त्रेणयस्त्वात्मानंप्रमापयेत् मृतोमेध्येनलिप्तोयोनान्यसंस्कारमर्हति १ ॥ पाशंछित्त्वातुयस्तस्यवोढावह्निप्रदस्तथा सोपिकृच्छ्रेणशुद्ध्येतघातकोपिनराधमः २ ॥

णादि कर्म नूं करके जेडे पुरुष प्रायश्चित्त नूं नहि करदे तिनकीशुद्धि दो २ तप्तकृच्छ्रसें होतीहै अर साथजान वाल्यांकी शुद्धि एक तप्तकृच्छ्रसें होतीहै ॥ ५ ॥ यइति स्नेहतें अथवा मजूरी करके जेडा पुरुष आत्मघातीकी संपूर्ण क्रिया कों करताहै तिसकी शुद्धिके वास्ते तप्तकृच्छ्र और चांद्रायण श्रेष्ठहै ॥ ६ ॥ इसी विषयमें बृहस्पतिजीने कहाहै ॥ विषेति विष और पाश और शस्त्र इनों करके जो पुरुष अपणे आपनूं हत करता है अर अपवित्र वस्तु करके लिप्त होआ होआ जो मृत होआहै सोपुरुष और संस्कारके योग्य नहि अर्थात् मरणानंतर दाहादिसंस्कार उसका नहि करणा किंतुइसीनूं जलविषे प्रवाहदेणा १। पाशमिति तिसके पाश का छेदन करके जो पुरुष तिसनू चुकणे वाला और अग्निके देणे वालाहै सोभी कृच्छ्रव्रत करके शुद्ध होताहै अर तिसके मारणे वाला भी नरांके मध्यमे नीच कृच्छ्रव्रत करके शुद्धहोताहै२

दक्षजीकावाक्यहै ॥ आरूढेति संन्यास मार्गको प्रथम धारण करके पश्चात् विषयांकी अभिलाषा करके तिसतें पतित होआ जो ब्राह्मण है अर चंडालांके दोष करके अपणी जातितें बाहर कीताजो पुरुष है और पाशकरके जो पुरुष मृत होआहै इनांनूं स्पर्श करके चांद्रायण व्रत नूं करे ॥ १ ॥ इसी का अर्थ स्पष्ट कीता है चांडालैरिति चांडालोंने पकड कर जेडा बंधनमै जोडया है सोचांडाल विनिःसृत है अथवा चांडालांके साथ रहकर जो आया है तिसका एह नाम है ॥ और स्मृतिमै इसकी जगा मंडलतें जो बाहर होया ऐसा अर्थ कीता है सुमंतु जीनें कहाहै उद्बंधेति अपरा धी को फांसी देणा

दक्षः ॥ आरूढपतितंविप्रंचांडालाच्चविनिःसृतम् उद्बंधनमृतंचैवस्पृष्ट्वाचां द्रायणंचरेत्१।चांडालैर्गृहीत्वोद्बंधने योजितं चांडालैःसहोषित्वापरागतंवा स्मृत्यंतरेतु मंडलाच्चविनिःसृतमितिपाठः तत्र सजातीयसमूहेनदूषयित्वाव हिष्कृतमित्यर्थः सुमंतुः। उद्बंधनपाशच्छेदनवहनेषु मासं भैक्षभक्षणंत्रिषव णंच स्नायात्। च्यवनः॥ आत्मघातकस्यस्पर्शनेवहने तप्तकृच्छ्रंचरेत्॥ विंश तिर्गावोदक्षिणा ब्राह्मणेषु दद्यात्॥ तथा ॥ शृंगिदंष्ट्रिनखिव्यालविषवह्नि महाजलैः सदूरात्परिहर्तव्यः कुर्वन्क्रीडांमृतस्तुयः॥ १ ॥ नागानांविप्रियं कुर्वन्दग्धश्चाप्यथविद्युता निगृहीताश्चयेराज्ञाचौरदोषेणकुत्रचित्॥ २ ॥

और पाशका छेदनकरणा और तिसको चुकणा इस विषयमें एक १ मास तक भिक्षाका अन्न भक्षण करे और तीन ३ काल स्नान करे ॥ च्यवन जीका वाक्य है आत्मेति आत्मघातीके स्पर्श और चुकणेके विषयमें तप्तकृच्छ्र व्रत का आचरण करे और बीस २० गौआं ब्राह्मणों को दक्षिणादेवे तैसे और कहतेहैं शृंगीति शृगांवाले अर्थात् गोमाहिष्यादि और सिंहादि और नखां वाले और सर्प और अग्नि और वडाजल इनोंकके और क्रीडा करदा होआ जो पुरुष मृत होआहै सो दूरतें हि त्याग करणे योग्यहै ॥ १ ॥ नागेति और सर्पांनू पगडदा होआ जो पुरुष मृत होआहै अथवा विजलीनें जो दग्ध कीता हैऔर चोरीके दोषकरके राजाने जेडे पुरुष पकडे हैं ॥ २ ॥

परेति परस्त्रीके हरनवाले अर कोधतें तिनां स्त्रीआंके पतिआंनें जो हत कीतेहैं अर भिन्न जातिवालोंनें अर संकीर्णजातिवालोंनें अर चांडालादियोंनें हत कीते जो पुरुष हैं ३ ॥ चौरेति चोर और अग्नि और विषइनके देणे वाले जोहैं और पाषंडी और खोटिआंबुद्धिआं वालेजो पुरुषहैं उीर क्रोधतें अतिशयकरके विषउीर अग्नि और शस्त्र और पाश और जल। ४। और पर्वत और वृक्ष इनांके गिडानेवाले नरांके मध्यमें नीच जेडेपुरुष तिनांकर्मांनू करदेहैं अर्थात् विषआदि करके जेडेपुरुष मृतहोवेहैं वा मारतेहैं और जेडे निंदित षिल्पकारि करके उपजीविका करतेहैं और जेडे स्थानांकों भूषण करतेहैं अर्थात् स्थान भूषण करणे करके उपजीविका करतेहैं ॥ ५ मुखइति जेडे कोईक पुरुष मुखे भग हैं अर्थात् जिनांके मुखसें दुर्गंध आवतीहै उीर जेडे नमर्दहैं उीर जेडे नपुंसकहैं अर्थात् जिनांका कीताहोया कार्य्य नाहि सिद्धहुंदा असे जो हैं

परदाराहरंतश्चरोषात्तत्पतिभिर्हताः असमानैस्तुसंकीर्णैश्चांडालाद्यैस्तथाहताः ॥ ३ ॥ चौराग्निविषदाश्चैवपाषण्डाःक्रूरबुद्धयः क्रोधात्प्रायोविषंवह्निंशस्त्रमुद्बंधनंजलम् ॥ ४ ॥ गिरिवृक्षप्रपातांश्च येकुर्वन्तिनराधमाः कुशिल्पजीविनोयेचस्थानालंकारकारिणः ॥ ५ ॥ मुखेभगास्तुयेकेचित्क्लीबप्रायानपुंसकाः ब्रह्मदंडहतायेचयेचवाब्राह्मणैर्हताः ॥ ६ ॥ महापातकिनोयेचपतितास्तेप्रकीर्त्तिताः पतितानांनदाहःस्यान्नांत्येष्टिर्नास्थिसंचयः ॥ ७ ॥ नचास्रुपातःपिंडोवाकार्यंश्राद्धादिकंक्वचित् एतानिपतितानांतुयःकरोतिविमोहितः तप्तकृच्छ्रद्वयेनैवतस्यशुद्धिर्नचान्यथा ॥ ८ ॥ पराशरः ॥ चांडालेनश्वपाकेनगोभिर्विप्रैर्हतोयदा आहिताग्निर्मृतोविप्रोविषेणात्महतोपिवा लौकाग्निनाप्रदग्धव्योमंत्रसंस्कारवर्जितः ॥ १ ॥

उीर जेडे ब्राह्मणांके शापकरके हतहोएहैं उीर जेडे ब्राह्मणांने हतकीतेहैं। ६ ।महेति उीर जेडे महापातकीहैं एह संपूर्णपतितकथन कीतेहैं और इनांपतितांका दाह उीर अंत्येष्टिकर्म उीर अस्थिआंका चुणना ७ ॥ उीर रोदन उीर पिंडदान उीर श्राद्धादिकर्म इनांनूंनकरे पतितांके इना कर्मांको जो पुरुष मोहित होया होया करताहै तिसकी शुद्धि दो २ तप्त कृच्छ्रव्रतकरके होतीहै उीर प्रकार करके नहि होती ॥ पराशरजीका वाकयहै ॥ ८ चंडेति चंडाल और श्वपाक अर्थात् चंडाल भेद उीर गो उीर ब्राह्मण इनांने जो हतकीताहै और विषकरके मृत होआजो अग्निहोत्री ब्राह्मणहै और आपजो हत होआहै अर्थात् आप पाशादि लै करकेजो हतहोआ है मंत्रांकरके संस्कारतें रहित लोककी अग्निकरके इनका दाह करणा हवन वालीअग्नि करके नहिकरणा १

स्पृष्टेति सजातियोंके मध्यमें इसकों जो स्पर्श करणे वाला और चुकणे वाला है सो प्राजापत्य व्रतनूंकरे अर पश्चात् ब्राह्मणांकी शिक्षानूं ग्रहण करे अर्थात् ब्राह्मण जो आज्ञा करें तिसनूंकरे ॥ २ ॥ दग्ध्वेति दाहकरके तिसकी अस्थिआंनू ग्रहण करके पश्चात् बुद्धिमान् पुरुष तिनाकों दुग्धकरके धोवेवे अर पश्चात् हवनवाली अग्नि करके अपणे मंत्रकों पढकर भिन्न २ दाहकरे ॥ ३ ॥ वशिष्ठजीका वचनहै जीवेति जो पुरुष पाश और विष आदिकरके मृत होनेलगे अर मृत नहि होआ जीवतारहाहै सो बारां १२ रात्रकृच्छ्रव्रतनूं करे और तीन ३ रात्र उपवास करे और नित्य हि गिल्ले वस्त्रनूं धारणकरके ॥ १ ॥ अर प्राणांनूं आत्माके विषय रोककरके तीन ३ बार अघमर्षण मंत्रका पठनकरे इसतें उपरंत तिसीविधिकरके गायत्रीकों जपे २

स्पृष्टादग्धाचवोढाचसपिंडेषुचसर्वशः ॥ प्राजापत्यंचरेत्पश्चाद्विप्राणामनुशासनम् ॥ २ ॥ दग्ध्वास्थीनिपुनर्गृह्यक्षीरेणक्षालयेद्बुधः ॥ स्वेनाग्निनापुनर्दाहःस्वमंत्रेणपृथक्पृथक् ॥ ३ ॥ वसिष्ठः ॥ जीवन्नात्मपरित्यागात्कृच्छ्रंद्वादशरात्रकम् ॥ चरेत्त्रिरात्रंचोपवसेन्नित्यंक्लिन्नेनवाससा ॥ १ ॥ प्राणानात्मनिचायम्यत्रिःपठेदघमर्षणम् अथवैतेनकल्पेनगायत्रींपरिवर्त्तयेत् ॥ २ ॥ अपिवाग्निंसमाधायकूष्माण्डैर्जुहुयाद्घृतम् यदन्यन्महापातकेभ्यस्सर्वमेतेनपूयते ॥ ३ ॥ अथवाचामेत् अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्यो रक्षंतांयदह्नापापमकार्षमनसावाचाहस्ताभ्यांपद्भ्यामुदरेण शिश्नाअहस्तदवलुम्पतुयत्किंचिदुरितंमयीदमहमापोऽमृतयोनौसत्येज्योतिषिजुहोमिस्वाहेति ॥ विष्णुः ॥ उद्बंधनमृतस्ययःपाशंछिंद्यात्सप्तरात्रेणकृच्छ्रेण शुद्ध्यति तप्तकृच्छ्रेणशुद्ध्यतीति पाठांतरम्

अथवाअग्निनूं समाधानकरके कूष्मांड संज्ञिक मंत्रोंकरके घृतका हवनकरे अर औरभी महापातकोंतें जो पाप होआहै सोभी संपूर्ण इसअनुष्ठान करके नष्टहोताहै ३ । अथवा आचमनकरके अग्निश्चमेति इस मंत्रकरके होमकरे इति ॥ इसमंत्रका अर्थ संध्याके व्याख्यानमे स्पष्टकरके लिखाहै सो उसीजगासें देखलेना । पापांतेंरक्षाहोणी तिसमे प्रार्थनाहै इसमंत्रमे । विष्णुजीकावचन है उद्बंधन करके अर्थात् फांसी लेकरके जोमृतहोआहै तिसके पाशकों जोपुरुष छेदताहै सो सप्तरात्रके कृच्छ्रव्रत करके शुद्ध होताहै । १ । और किसेजगा तप्त कृच्छ्र करके शुद्ध हुंदाहै ऐसा लिखाहै

आत्मेति पाशादिकरके जेडेदेहकों त्यागतेहैं अर्थात् फांसी और विष इत्यादिकरके जो मृत होएहैं तिनाकों स्नानादि पूर्वकभूषण करणे वाला और तिनांके निमित्तरोदनकरणे वाला और संपूर्ण प्रेतके बांधवांके साथरोदन करणे वाला स्नान करके शुद्धहोताहै और प्रेतकेबांधवांके साथ अस्थिसंचयनकों करके साहितवस्त्रांके स्नानकरे तों शुद्धहोताहै जो ब्राह्मणक्षत्री अथवा वैश्य शूद्र शवकेसाथ जावे तब नदीकों प्राप्त होकरके आठ सें अधिक हजार १००८ गायत्रीका जप करें (अर्थ) केवल ब्राह्मण शवके साथ जावे तब आठ से अधिक हजार १००८ गायत्रीका जप करे अर शूद्र किसे शवके साथ गमन करके स्नानकों करे ॥ अर प्रेतके संबंधिआंके साथ रोदन कों करके भी स्नान करके शुद्ध होताहै अर प्रेतके बांधवांके साथ अस्थिसंचयनकों करे तब समेत वस्त्रांके स्नानकों करके शुद्ध होताहै ॥ अथेति इसतें उपरंत अनाशका दि जो व्रत कुरुक्षेत्रादि विषे धारण कीते होए तिनांसें यो हट जाय

आत्मत्यागिनांच संस्कर्त्ता तदश्रुपातकारीच सर्वस्यैवप्रेतस्य तद्बान्धवैःसहा श्रुपातंकृत्वास्नानेवाकृतेऽस्थिसंचयने सचैलस्नानाद्द्विजःशूद्रःप्रेतानुगमनंकृत्वा स्रवन्तीमासाद्यगायत्र्यष्टसहस्रंजपेत्। द्विजःप्रेतानुगमनेष्टाधिकसहस्रम् शूद्रःप्रेतानुगमनंकृत्वास्नानमाचरेत् । तद्बांधवैःसहाश्रुपातंकृत्वास्नानेनशुद्ध्यति। तद्बांधवैःसहास्थिसंचयने कृते सचैलस्नानाच्छुद्ध्यतीत्यन्वयः ॥ अथानाशकादिप्रच्युतप्रायश्चित्तानि ॥ तत्रमार्कण्डेयः ॥ येप्रत्यवसिता विप्राः प्रव्रज्यादिजलाग्नितः अनाशकान्निवृत्तायेवांछंतिगृहमेधिताम् १ ॥ तांश्चारयित्वात्रीन्कृच्छ्रांस्त्रीणिचान्द्रायणानिवा जातकर्मादिसंस्कारैः संस्कृताः शुद्धिभाजनाः ॥ २ ॥ पराशरः ॥ अनाशनान्निवृत्तस्तुचातुर्वर्ण्येव्यवस्थितः चांडालस्सतुविज्ञेयोवर्जनीयःप्रयत्नतः ॥ १ ॥

तिनके प्रायश्चित्तांकों कहतेहैं। तिनांके विषय प्रथम मार्कंडेयजीका वाक्यहै । यइति जो ब्राह्मण संन्यासकर्म और जल और अग्नि इनके विषय मरणके वास्ते प्रथम उद्यत होए हैं अर फेर हट गये हैं और जिनांने इच्छा सें अन्नका त्याग कीता है तिसतें जेडे हट गये हे अर फेर गृहस्थ की इच्छा करतेहैं ॥ १ ॥ तानिति तिनां कों तीन ३ कृच्छ्र व्रत अथवा तीन ३ चांद्रायण व्रत करवाके पश्चात् जात कर्मतें आद लेकर संस्कारां करके संस्कृत कीते होए शुद्ध होतेहैं ॥ २ ॥ पराशर जीका वाक्यहे अनेति अनाशक तें जो हटिआ है और ब्राह्मण और क्षत्री अथवा वैश्य अथवा शूद्र जलादिके विषय मरणके वास्ते प्रथम निश्चय करके फेर जो हट गयाहे सो पुरुष चंडाल कथन कीताहे अर सो यत्न करके दूरतें हि त्यागना चाहिए ॥ १ ॥

